॥पदार्थदिपिकाप्रारंभोयं॥शुभंभवतु॥

प॰दी॰

॥१॥ ॥श्रीगणेशाय नमः॥ श्रीमत्सिद्धिकरं कांतं स्मेरमारमणात्मकं। दयासिंधुं चिदानंदं सीता
सितमुपास्महे॥१॥ इह खलु चतुर्थपुरुषार्थहेतुभूतम् आत्मतत्त्वज्ञानम् आमनंति॥ तच्च पदार्थत
त्त्वनिर्णयात्॥ अतो भ्रमितिपदार्थतत्त्वमत्र विविच्यते॥ तत्र प्रमितिविषयाः पदार्थाः॥ स द्विधा॥ भा
वोऽभावश्च॥ भावाः षड्विधाः॥ द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात्॥
तत्र द्रव्यत्वजातिमद् गुणाश्रयो वा द्रव्यं॥ तच्च पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनो
दान्नवधा॥ तत्र पृथिवीत्वजातिमती गंधवती वा पृथिवी॥ अत्र मुक्तावस्थादावप्युद्भूतगं
धोऽस्त्येवेति न तत्राव्याप्तिः॥ तद्व्यक्तिगंधोपलंभेन तत्रापि गंधकल्पनात्॥ अथवा गंध
वत्त्वं गंधसमानाधिकरणजलावृत्तिजातिमत्त्वं॥ गंधसमानाधिकरणद्रव्यत्वादिकमा
दाय जलादावतिव्याप्तिवारणाय जलावृत्तीति॥ एतेन नानागंधवदारब्धपदार्थस्य नि
र्गंधत्वपक्षेऽपि न तत्राव्याप्तिः॥ नाप्यत्र पृथिवीत्वसत्वात्॥ सा च पृथिवी द्विविधा॥ नित्याऽनि
पा त्या च॥ परमाणुरूपा नित्या॥ कार्यरूपाऽनित्या॥ यद्यपि जालसूर्यमरीचिस्थं सर्वतः सूक्ष्ममुप
लभ्यते तत् त्र्यणुकं॥ तस्य षष्ठोंऽशः परमाणुः॥ तत्त्रिभिर्द्व्यणुकैरारभ्यते॥ द्वाभ्यां परमाणु राम
भ्यां च द्व्यणुकमिति स्वीकारात्॥ कार्यरूपा च त्रिविधा॥ शरीरेंद्रियविषयभेदात्॥ शरीरं तु सा ॥१॥

वयविशेषो भोगायतनं। भोगनियामकं इति यावत्॥ तत्संबंधा। शुक्रशोणितान्यां विनैवादृष्टविशे
षोपगृहीतं पृथिवीजन्यं। जरायुजमंडजं स्वेदजमुद्भिज्जं चा। आद्यं वसिष्ठादेः॥ गर्भवरकश्चर्म
विशेषो जरायुस्तज्जं मानुषादि। अंडजं पक्ष्यादि। स्वेदजं लिक्षायूकादि पृथिवीमुद्भिद्य जा भि
यमानं वृक्षाद्युद्भिज्जं॥ इंद्रियं घ्राणं॥ गंधनकृतज्ञापितं तदभावानामेव ग्राहकं नासाग्रवर्ति॥ २
नसाधिष्ठानमेव। रूपादिषु पंचसु गंधस्यैवाभिव्यंजकत्वात्। कुंकुमगंधाभिव्यंजकतैलवत्॥ सक्तुर
सनवत्॥ वस्त्रारागंधाभिव्यंजकजलेतिव्याप्तिवारणाय एवकारः॥ विषयाः पुष्पादयः॥ अप्त्वहा
तिमत्यः शीतस्पर्शवत्यो वा आपः॥ ता अपि द्विधा। नित्या अनित्याश्च। परमाणुरूपा नित्याः का
र्यरूपा अनित्याः॥ ता अपि त्रिधा। शरीरेंद्रियविषयभेदात्। शरीरं वरुणलोके। तत्तु पार्थिवा
वयवमिलनात्करकावद्दृढविशेषाद्वा घनीभूतं दृढं सद्भोगोपयोगि॥ इंद्रियं रसनं। तच्च
रसतज्ज्ञापितं तदभावानामेव ग्राहकं। जिह्वाग्रवर्त्ति तदाप्यमेव रूपादिषु पंचसु रसस्यैवा
भिव्यंजकत्वात्। लालावत्। जलमाधुर्यव्यंजकहरीतक्यामलकादौ व्यभिचारवारणायैव २
कारः॥ तयोः कषायाम्लरसवत्तया पटरंजकद्रव्यरूपविशेषाभिव्यंजकत्वात् विषया गंगा
घाः॥ ॥ तेजस्त्वजातिमदुष्णस्पर्शवद्वा परप्रकाशकरूपवद्वा तेजः॥ ॥ नित्यमनित्यं च
परमाणुरूपं नित्यं। कार्यरूपमनित्यं। तदपि त्रिधा। शरीरेंद्रियविषयभेदात्। शरीरमादि

प॰दी॰ स्यल्लोके। इंद्रियं चक्षुः। रूपेत ज्ञातिते इत्यनेन ज्ञातिगुणकर्मणां ग्राहकं। कृष्णतारा

॥२॥ ग्रवर्त्ति। तत्तैजसमेव। रूपादिषु चक्षुरूपस्यैवाभिव्यंजकत्वात्। आलोकवत्। पूर्वदूरी व॰२

नक्वामलकादौ व्यभिचारवारणायैवकारः॥ ननु रूपवान्परमाणुश्चक्षुषा कुतो न

द्रव्य गृह्यते। चाक्षुषप्रत्यक्षे विषयगतं महत्वं हेतुः परमाणौ नास्तीति चेत्त्र्यणुकारण

द्व्यणुकः कुतो न गृह्यते। विषयगतं रूपं महत्वं चेतद्द्वयमपि हेतुरिति चेत्तर्हि तप्तवारिस्थते

जउष्मा वा कुतो न गृह्यते उच्यते। द्रव्यचाक्षुषप्रत्यक्षे विषयगतमुद्भूतं रूपं महत्वं च

कारणं। परमाणुर्न महान्। आकाशो न रूपवान्। तप्तवारिस्थतेजस्यनोद्भूतरूपवत्

तद्रूपस्यानुद्भूतत्वात्॥ एवं चाक्षुषप्रत्यक्षे विषयगतोद्भूतस्पर्शोपि हेतुः। बाह्येन्द्रियजन्य

रूप द्रव्यप्रत्यक्षमात्रे एवं महत्वं स्पर्शो नालाघवाद्धेतुत्वात्। तथा च प्रदीपादिप्रभायाः रूपमात्रं

गृह्यते। तेन न तदाश्रयद्रव्यमनुमीयते इति सिद्धांतः। प्रभाशब्दोपि तद्रूपवाचक एवेत्याहुः॥

ननु चैवमपि अंधकारस्थो घटोपि दृश्यतां द्रव्यचाक्षुषे आलोकसंयोगोपि हेतुरिति चेत्। न।

चक्षुरूपस्य सुवर्णरूपस्य चांधकारेपि संयोगस्य चाहितिरिति चेन्न। द्रव्यप्रत्यक्षे उद्भूतान राम

भिभूतरूपालोकसंयोगस्यापि हेतुत्वात्॥ चक्षुरूपस्योद्भूतत्वाभावात्। सुवर्णरूपस्या ॥२॥

भिभूतत्वान्न संयोगोपि न प्रत्यक्षम्॥ विषम [illegible] पार्थिवम

न्धनं तेजो भौमं अग्न्यादि। अबिंधनं तेजो दिव्यं। विद्युदादि। उभयेंधनमुदर्यं॥ भक्षितान्नस्य पीतज-
लस्य च पचनात्। खनिजमाकरजं सुवर्णादि। ननु सुवर्णं न तेजः। शुभ्रप्रकाशकरूपविरहात्। उष्णस्पर्शा-
भावाच्चेति चेत्। न। अभिभूतरूपस्पर्शयोस्तत्र स्वीकारात्। पीतरूपवंतः पार्थिवभागास्तत्र मिलिताः संति
ति तदीयरूपस्पर्शाभ्यां तयोरभिभवः संभवत्येव। बलवत्सजातीयग्रहणकृतमग्रहणं ह्यभिभवः तार-
रा ह्यामंद्रस्येव। मीमांसकास्तु। पीतरूपवद्द्रव्यांतरमेव सुवर्णमूचिरे। तन्न। द्रव्यांतरकल्पने गौरवात्। अ-
न्ये तु न्यायैकदेशिनः। हरिद्रादिवत्पीतरूपवत्त्वात्पार्थिवमेव सुवर्णमित्याहुः॥ तन्न। अत्यंतानलसंयोगाद्भस्मा-
पत्तेः॥ वायुस्त्वाह॥ नीरूपस्पर्शवान्वायुः॥ सोपि द्विधा। नित्योऽनित्यश्च। परमाणुरूपो नित्यः। कार्यरूपोऽ-
नित्यः॥ सोपि शरीरेंद्रियविषयप्राणभेदाच्चतुर्धा॥ शरीरं वायुलोके पिशाचादीनां च। इंद्रियं त्वक्सक-
लशरीरव्यापकं॥ सिद्धानाड्यां तत्सत्वेपि त्वङ्मनोयोगस्य स्वप्नजनकत्वात्तदा स्वप्नज्ञानमेव न त्वाचादि। पुरी-
तत्यामेव परं नास्ति। अतः तस्यां मनःप्रवेशो ज्ञानशून्या सुषुप्तिर्भवति॥ ज्ञानमात्रे त्वङ्मनोयोगस्य हेतु-
त्वेन तदानीं तदभावाद्ज्ञानाभावोपपत्तेः॥ तत्तु वायवीयमेव॥ रूपादिषु पंचसु स्पर्शस्यैवाभिव्यंजकत्वात्। अंग-
संगिसलिलशैत्याभिव्यंजकपवनवत्॥ एवं चादौ जलस्पर्शव्यंजके व्यभिचारवारणायैवकारः। नन्वुद्भूतस्प-
३ र्शत्वजातितदभावोद्भूतरूपस्पर्शवत्द्रव्यत्वतद्गुणत्वजाति तदभावानां ग्राहकं। अत उद्भूतरूपाभावा-
न्न प्रवारिस्कं तेजोरूपाभावाद्वायुश्चक्षुषा न गृह्यते। किंतु त्वक्स्पर्शमात्रेण गृह्यते। तदा अवयवेन वायुरनुमी-
यत इति सिद्धांतः॥ एवं प्रदीपवच्चंद्रादि [illegible] मीमांसकास्तु॥

प. दी. उद्भूतस्पर्शवद्द्रव्यं च चोद्योग्यं लाघवात्। ननु रूपमपि तत्र भवेदेवं गौरवात्। अतो वायुरपि स्पार्श-
॥३॥ नप्रत्यक्ष एव वायुं स्पृशामीत्यनुभवात्। अन्यथा घटादेः स्पर्शो गृह्यते तेन द्रव्यमनुमीयत इति व-
क्तुं शक्यत्वात् किमपि द्रव्यं स्पार्शनप्रत्यक्षं न स्यात्॥ किं च चक्षुषा रूपं गृह्यते घटादितदाश्रयस्ते-
नानुमीयत इत्यपि स्यात्। तथा च द्रव्यमतीन्द्रियमेव स्यात्। एवं महदुद्भूतरूपवद्द्रव्यं चक्षुर्योग्यं।
अतः प्रदीपचन्द्रादिप्रभापि चक्षुर्ग्राह्येत्याहुः॥ विषयस्तु वृक्षादिकम्पजनकः। प्राणः पंचधा॥
प्राणापानव्यानोदानसमानभेदात्॥ इति वायुः॥ अथ आकाशः॥ स च न कार्यस्य शब्दस्य सर्वत्रोपलम्भाद्विभुः।
लाघवादेको नित्यश्च। श्रोत्रं तदीयमिन्द्रियं। अदृष्टविशेषोपगृहीतकर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रं।
अ बधिरस्यादृष्टविशेषाभावान्न श्रोत्रमस्ति॥ कालस्तु परत्वापरत्वाऽनुमेयः कालः॥ स चैकोऽपि वर्तमाना-
ह तीतभविष्यत्क्रियोपाधिवशात्त्रिधा नानादिसंज्ञां लभते॥ पाकपचनादिक्रियाविशेषजातानरकपाककादिव्य-
पदेशवत्॥ दिगेका नित्या दैशिकपरत्वापरत्वासाधारणकारणं॥ प्राचीं दक्षिणप्रतीचीमुदीचीति वरुणवायुकुबे-
पा रेशानब्रह्मानन्तरूपोपाधिवशात् पूर्वादिभेदेन दशसंज्ञां लभते। एकोऽपि कालो जगदाधारो इदा-
व्य नीं करोतीति सर्वानुभवात्। आत्मत्वसामान्यवान् ज्ञानाश्रयो वा आत्मा। नित्यश्च द्विधा। जीवेश्वरभे-
दात्। सुखाद्याश्रयोऽहंप्रत्ययवेद्यो जीवः॥ नन्वहं गौरः अहं जानामीति समानोपलम्भात् गौरत्वादिरूपव- राम
ति ज्ञानसुखाश्रयता सिध्यतीति देह एवात्मा स्यात्॥ न च शरीरं नात्मा ज्ञानशून्यत्वात्। तदपि शरीरं ज्ञा- ॥३॥
नशून्यं पार्थिवत्वात् घटवदित्यनुमानात् [illegible] शून्यत्वेऽपि भ-

तत्समुदायात्मकत्वाच्छरीरस्य ज्ञानवत्वसंभवात् । केवलचूर्णादौ रागाभावेपि चूर्णपर्णादितांबूले रागोसति
वत् । अहं ज्ञानवानिति प्रत्यक्षबाधेनानुमानस्य शरीरे ज्ञानाभावसाधकत्वाच्च । वह्निरनुष्णः कृतकत्वात् घटवदि
न३ त्यनुमानवत् स्थूलः कृशश्च देह एवात्मेति चार्वाकाः ।। एवं काणोहं बधिरोहमितींद्रियधर्मसामानाधिकरण्यादिंद्रि
याण्येवात्मेत्यपरे वदंति ।। तत्कथं नित्यो विभुरात्मेति संगच्छते इति चेन्न । शरीरेंद्रियाणामनित्यत्वेनात्मत्वासंभवात् । अ
न चात्माप्यनित्य एवास्तु । कृतहानाकृताभ्यागमप्रसंगात् । धर्माधर्मशास्त्रवैयर्थ्यापत्तेः ।। किंच कश्चिदुत्तमारभो
वरूपभाग्यादिमान् कुलान्य इति नियमात् दृष्टविशेषो हेतुर्वाच्यः । स चैतज्जन्मनि न संपादितः तत्संपादकजन्मांतरयो
ग्यात्मसिद्धिः । अनेन जन्मयोगिनश्च नित्यतेव ।। नाशकाभावात् ।। न च स्वतंत्र ईश्वर एव स्वेच्छाचारात् स्वसृष्टप्रा
णिष्वेवं करोति कुलाल इव स्वनिर्मितघटेषु कस्मिंश्चिद्गंधयोगं कस्मिंश्चिन्मूत्रपुरीषयोगमिति वाच्यं ।। अचेतनेष्विव न
प चेतनेन तथाव्यवहारे वैषम्येण नैर्घृण्यप्रसंगात् । दृश्यते कुलालादेरेव घटादिवस्तुत्वेषु निर्निमित्तकतथा
व्यवहारे वैशम्यादिप्रयुक्ता निंदेति । न चायं नित्यः परमाणुरूप एवास्तु । सकलशरीरव्यापि सुखदुःखा
ननुभवप्रसंगात् । परमाणुरूपवज्ज्ञानादेस्तद्धर्मस्याप्रत्यक्षापत्तेश्च । स च प्रतिशरीरं भिन्नः । सुखदुःखा
५ द्ययोगपद्यादिवैचित्र्याच्च । अन्यथा परकीयसुखदुःखानुसंधानप्रसंगाच्च । हस्तपादादिभेदस्येव शरी सं ४
रभेदस्याप्रयोजकतयाननुसंधानाप्रयोजकत्वात् । जातिस्मरणं जन्मांतरीयार्थस्मरणापत्तेश्चेति
दिक् ।। ।। दुःखासमानाधिकरणज्ञानवान्नित्यज्ञानाश्रयो वा ईश्वरः ।। स च सकलकार्यकर्तृत्वेन
सिध्यतीति वक्ष्यते । आत्मनस्सुखादिप्रत्यक्षकरणं मनः ।। तच्च परमाणुपरिमाणं प्रतिपुरुषं भिन्नं । यत्र यत्रै

प.दी. द्रियेसंयुज्यतेतत्तस्मात्तोज्ञानमुत्पद्यते अतो युगपदनेकेंद्रियैर्ज्ञानानुपपत्तिः। अन्यथा युगपद्रूपरसा
॥४॥ दिग्रहणपत्तौव्यासंगमात्रज्ञातमित्यनुभवोत्पत्तेः। तथा च गौतमसूत्रं। युगपज्ज्ञानानुत्पत्तिर्मनसो लिंगमिति।
अतएव मनो विभुनित्यद्रव्यं चात् आकाशवदिति मीमांसकोक्तमपास्तं। अत्र यानि नानां तु अभ्यास
१५ विशेषात् प्रेरणया झटिति मनःसंक्रियया तत्तदिंद्रियेयोगात् ज्ञानक्रमिकत्वेपि योगपद्याभिमानमा
त्रं। नन्वंधकारोपि निःस्पर्शत्वात् क्रियावत्त्वादिलक्षणरूपवत्त्वाच्च पृथिव्यादिभ्यो भिन्नं दशमं द्रव्यम
स्तीति कथं नवैव द्रव्याणीति चेन्न। एवं तस्य रूपवद्द्रव्यत्वे चक्षुषा ग्रहणं न स्यात्। द्रव्यचाक्षुषमात्रे उ ८
द्भूतानभिरूपवदालोकसंयोगस्य हेतुत्वात्। न च चक्षुर्गोलकरश्मिनामसंद्रियांतरादंधकारग्रहः इं
द्रियांतरकल्पने गौरवात्। किं चांधकारस्य मनियतत्त्व आलोकाभावेऽवश्यमभ्युपेयः तथा च तेनैवा
रोपितनीलरूपेणांधकारं इति व्यवहारसंभवात् न द्रव्यांतरं तमः अतिगौरवात्। तस्माद्द्रव्याणि न
९ नियतरूपवदालोकाभावस्तमः। गुणांश्चतुर्विंशतिमतो गुणाः। ते च रूपरसगंधस्पर्शसंख्या
परिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्मा मे
धर्मसंस्काराख्याश्चतुर्विंशतिरेव॥ तत्र रूपत्वजातिमद्रूपं। पृथिव्यादित्रयवृत्ति। शुक्लनीलहरितर
क्तपीतकपिलचित्रभेदात् सप्तधा। तदवांतरजातयस्त्वसंख्याताः। तत्र शुक्लमभास्वरं तेजसि परप्रका राम
शकतावच्छेदकजातिविशेषाभास्वरत्वं तद्भास्वरं। शुक्लमेवाभास्वरमपाके कमत्सुषद्विधमपि ॥४॥
त्रं पाकजं पृथिवीपरमाणौ। सप्तविधमप्यपाकजमेव पृथिवीद्व्यणुकादौ। तत्राद्यवृत्ति रूपं जन्य

वयवरूपं कारणं। एवं रसादावपि। मीमांसकास्तु। एकैक एव नीलपीतारुणादिव्यक्तयो नित्याश्च।
ताश्चावयवमानघटादौ घटत्वादिवत् संसृज्यंत इति रूपवान् घट इत्यादिप्रतीतिः। घटादिनाशे
च व्यक्त्यंतरे घटत्वादिवदेव वर्तंत इत्याहुः। तन्न। एवं हि घटत्वादिवज्जातित्वापत्तेः। नित्यमनेकसमवे
तं सामान्यमिति तल्लक्षणयोगात्। इष्टापत्तौ नीलनीलतरादिव्यवहारानापत्तेः। नहि भवति गोतरो
गोतम इति। किंच नीलद्रव्यस्य पाके नरक्तताया दर्शनस्थले विनाशस्याकामेनाप्यभ्युपेयत्वान्न
किंचिदेतत्। रसत्वजातिमान् रसः। पृथिवीजलवृत्तिः। मधुराम्लकटुतिक्तकषायलवणभेदात् षो
ढा। मधुरोपाकजोऽप्सु। षड्विधोपि पाकजः पृथिवीपरमाणौ। द्व्यणुकादावपाकजः। गंधत्वजाति
मान् गंधः। पृथिवीमात्रवृत्तिः। जलादौ तु षष्ठंभकभागगत एव लोहितस्फटिक इतिवत्प्रतीयते। अत एव। क
5
पुष्पाद्युपरि समागतवायुना पुष्पाद्यवयवा एवानीयंत इति सिद्धांतः। नन्वेवं पुष्पादेः सच्छिद्र
ताकल्पार्यादिः परिमाणन्यूनता च स्यादिति चेत्। न। भोजकादृष्टवशात्पुनर्भागानां पूरणाद्युपग
मात्। क्वचित् कर्पूरादौ तथात्वस्येष्टत्वात्। सुरभिरसुरभिश्चेति द्विधा। सोपि पाकजः परमाणौ। ति
द्व्यणुकादावपाकजः। स्पर्शत्वजातिमान् स्पर्शः। पृथिव्यादिचतुष्टयवृत्तिः। शीतोष्णानुष्णाशी च
तभेदात्त्रिधा। शीतोऽप्सु। उष्णस्तेजसि। अनुष्णाशीतः पृथिव्यां वायौ। वायावपाकज एव। पृथिवी दीवा
परमाणौ पाकजः। पृथिवीद्व्यणुकादावपाकजः। कोमलकठिनचित्रभेदादनेकधा। ननु कथं रू
पस्पर्शयोर्वैचित्र्यमुदाहृतं। रसगंधयोरपि हरीतक्यादौ चित्रयोर्दर्शनात् [illegible] नानारससमुदाय एव

प.दी. सेत। षड्रसा हरीतकीति व्यवहारादिति वाच्यं। रूपस्पर्शयोरव्येवमापत्तेः। चित्ररूपवति अत्र स्याम भग्नरक्त
१५॥ मिसाद्यनुभवाद्व्यवहाराच्चेति चेत्। उच्यते। न तावन्नीलपीतादिरेको नीलं संभवति। समवायेन नीलं प्र
तिस्वाश्रयसमवेतत्वसंबंधेन नीलेतरस्य प्रतिबंधकत्वात्। अन्यथापीतावच्छेदेनापि नीलापत्तेः।
नापि परस्परप्रतिबंधादुभयोरसंभवेन नीरूपत्वमेवास्त्विति वाच्यं। अतीन्द्रियतापत्तेः। विषयग
तोद्भूतरूपस्य प्रत्यक्षे हेतुताधीयाः अगम्भिद्धितत्वात्। तस्मान्नीलपीतादिविलक्षणमेव चित्रं
तज्जन्यत इति युज्यते। एवं स्पर्शे विवेचेयं। मधुरसयोस्त्वस्वीकारेपि न क्षतिः। तयोः प्रत्यक्षाहेतु
त्वात्। केचित्तु चित्ररसगंधावपीच्छंति तन्न वर्धमानादिविनाशात्। ननु रूपादयः पृथिवीपर
माणावेव पाकजा इति कथं संगच्छते। आपाकनिक्षिप्तघटादावपि पूर्वनाशापरोत्पत्त्यो
रनुभवसिद्धत्वादिति चेत् न तयोर्घटस्येव पाकजरूपाद्यनुभवसिद्धं। तत्रैव तत्राग्निसंयोगज्जा
यते तेजोग्निसंयोगस्यैव पाकत्वात्। तथा च वह्निविधातात्रपरमाणुपर्यंतघटावयवेषु तद
वयवानां विभागः। ततः परस्परसंयोगनाशः। ततो विभक्तितेषु तेषु परमाणुषु समवायि
कारणनाशाद्द्व्यणुकनाशे तत्तत्र श्यामः परमाणवः पच्यते। ततः कदाचित्समानादग्निसंयोगादेकजाती
यं विलक्षणोत्तपरस्परविलक्षणं रूपमुत्पद्यते। पुनर्भोगादृष्टसहकृतेश्वर एव सृष्ट्या रा म
संविवक्षुर्द्व्यणुकादिक्रमेण पूर्ववदेवतादारंभात्परे ... संस्थानवत्करोति। तथा च परमाणुरू ॥१५॥
पात् द्व्यणुके तत् द्व्यणुकादिक्रमेण कृत्स्नानि निर्मितघटइव तत्रापि रूपाद्युत्पत्तिर्भवति।

रवी

परमाणावेव पाकजरूपरसगंधस्पर्शाः न द्व्यणुकादौ विविति। घटादावेव पाकाभ्युपगमे कठिनघटा
दिमध्यभागे वह्न्यप्रवेशात् मध्ये पूर्वरूपादिनाशनवीनोत्पत्ती न स्यातामिति रागादाः॥ नैयायिकास्तु
घटादयः सच्छिद्राण्येव द्रव्याणि। कथमन्यथांभोऽतर्गतोदनादिपाकः कथं वा तन्मध्यवर्तिजलस्यंद
नस्रवणे। तथा च तद्द्वारा प्रविष्टवह्निना मध्येपि पाकसंभवाद्गौरवग्रस्तनिष्ठ्रमाणकपूर्वनाशन
रा वीनोत्पत्तिकल्पना तदुत्पादयोः श्वेरभारं च न सहंते। तथा च तन्मते घटादावपि पाकजं सिध्यति॥
ननु संयोगस्योभयनिष्ठत्वात् घटादिवद्वह्नावपि रूपरसादयः कुतो न भवंतीति चेत्॥ सत्यं॥ समवा
येन पाकजरूपं प्रति पृथिवीत्वेन हेतुत्वात्। वह्नेस्तैजसत्वात्। इदमेव च पृथिवीत्वं जातौ प्रमाणं॥ ननु
मत्त्वद्येप्यग्निसंयोगादेकस्माद्विलक्षणाभिन्ना रूपादयः कथं प्रागभावभेदादिति चेन्न।
तस्य वैलक्षण्यस्याप्रयोजकत्वात्। अन्यथा घटानामपि पटादिवत्परस्परवैलक्षण्यापत्तेरि
ति चेन्न॥ रूपवति घटे रूपांतरानुत्पत्तेः। रूपं प्रति रूपं प्रतिबंधकमिति सर्वसिद्धं॥ एवं रसाद
वपि। तथा च प्रतिबंधकाभावरूपतत्तदभावकारणभेदवैलक्षण्याभ्यां भेदवैलक्षण्ये। द्वित्वत्रि
6 त्वादितद्व्यणुकत्र्यणुकाणुत्वह्रस्वत्वदीर्घत्वमहत्त्वेष्वप्येवमेव भेदादि॥ केचित्त्वग्निसंयोगभेदा
देव भेदमाहुः तेषामणुत्वादौ गतिश्चिंत्या॥ ननु स्पर्शस्य पाकजत्वे किं मानं न हि रूपरसादिवत्साक्षा
त्संस्पर्शांतरमनुभूयते॥ न च चंडालस्पर्शनिषेधगोब्राह्मणस्पर्शविध्यनुपपत्त्यात्सिद्धिरित्याचा
र्यैरुक्तं युक्तं। तत्र स्पर्शपदस्य संयोगपरत्वात्। अन्यथा गंगास्पर्शविधि कर्मनाशाजलस्पर्शनिषे

त.दी ॥९॥
धानुरोधाज्जले पिठीपाके स्पर्शनिषेधयात्मेन शर्नियादीपस्पर्शे चिष्णुरोधात्तेजसि तासिध्या
पत्तेरिति चेन्न॥ पूर्वकठिनस्य पाकेन कोमलतायाः पूर्वकोमलस्य पाकेन काठिन्यस्य चानुभ
वसिद्धत्वेन रूपादिवत्पाकजत्वसिद्धेः॥ न च काठिन्यकोमलत्वे संयोगविशेषौ॥ चाक्षुषत्वापत्तेः
एते रूपरसगन्धस्पर्शा अनुद्भूतानुद्भूतभेदान्न द्विधा॥ उद्भूतत्वं जातिः सद्भावोऽनुद्भूतत्वमिति प्राञ्चः॥ नव्याः
अनुद्भूतत्वं जातिः सद्भाव उद्भूतत्वमिति मतभेदकाराः। संख्यात्वजातिमती संख्या। एकत्वद्वित्वत्रि
त्वभेदादिविधा। सकलैकव्यक्तिवृत्तिः तत्रावयवगतैकत्वेनावयव्येकत्वं जन्यते। द्वित्वादौ विशेषः
घटद्वये च क्षेत्रसंयोगे सति नायमेकोऽयमेक इत्यपेक्षाबुद्ध्या द्वित्वोत्पत्तिरनन्तरं द्वित्वादि
त्वनिर्विकल्पकमनन्तरमिमौ द्वाविति प्रतीतिर्भवति। तत्र घटद्वयेकत्वद्वयमसमवायिकार द्वित्वे
णं। अपेक्षाबुद्धिर्निमित्तकारणं। द्वौ घटौ समवायिकारणौ। एवं बहुत्वेऽपि। अपेक्षाबुद्धिनाशात्
द्वित्वादिनाशः। अत एवापेक्षाबुद्धिः स्वजन्यगुणयत्क्षणविनाशिनी। अन्यथा द्वित्वादिविशिष्टप्रत्यक्षायो
गात्। तद्भिन्नज्ञानेच्छोदिनष्टवेति सिद्धान्तः। परमाणुद्व्यणुकादिगतद्वित्वं चित्तादेर्भगवदपेक्षा
बुद्ध्योत्पन्नस्य च निमित्तकारणादृष्टनाशान्नाशः। न च यमेकोऽयमेक इत्यादिद्वयादिविषया॥ राम
पेक्षाबुद्ध्या द्वयोर्द्वित्वं त्रिषु त्रित्वमित्यादिनियमः कुतः वैपरीत्यस्याद्भावित्वात्। समवायिकारण ॥९॥
द्वित्वाद्यकार्यवैलक्षण्यं वा कथं न चैकत्वद्वयं द्वित्वे त्रित्वे च त्रयं हेतुरिति वाच्यं। एकत्वे द्वित्वादावप्र

प्रयत्नादिवत्तद्भिन्नास्यात्

वात्। द्वित्वोत्पत्तेः प्रागेव द्रव्ये भिन्नद्भावाद्द्वित्वे द्रव्यत्वं हेतुरित्यस्याप्यसंभवात्। न च प्रागभावादेरनुपप
त्तिरित्याचार्योक्तं युक्तं। तस्य चेत्‌ लक्षणाप्रयोजकत्वात्। अन्यथा कार्यत्वे लक्षण्याकारणत्वे जोस्य क
ल्पनोच्छेदापत्तिरिति चेत्। उच्यते। केवलापेक्षाबुद्ध्या द्वित्वं द्वित्वसहितं च त्रित्वं तत्सहितया चतुष्ट्वमि
त्यभ्युपगमात्॥ द्वित्वं द्वयोरेव कुतः इति चेत्॥ तत्रैव तत्प्रागभावसत्त्वादिति गृहाण। परिमाणत्वव
त्परिमाणं। सकलद्रव्यवृत्ति तच्चतुर्विधं। अणुमहद्दीर्घह्रस्वभेदात्। तत्रोत्कृष्टाणुत्वह्रस्वत्वे परमा
णुमनसोर्नित्ये। अपकृष्टं द्व्यणुके एव। महत्त्वदीर्घत्वे उत्कृष्टे नित्ये। आकाशादौ विभुत्वशब्दवाच्ये॥
अपकृष्टे जन्ये तरतमभावेन त्र्यणुकादौ स्तः॥ बिल्वादामलकमणु इति व्यवहारस्तु अपकृष्टम
हत्त्वाद्गौणः। एवं प्रांशौ वामनो ह्रस्व इत्यपि अपकृष्टदीर्घत्वाद्गौणः। तत्र द्व्यणुकपरिमाणं परमाणु
बहुत्वात् द्वित्वसंख्यायोनि। त्र्यणुकगतमहत्त्वं त्र्यणुके महत्त्वं। घटादौ च कपालमहत्त्वं क्वचित्। क्वचिद्बहु
त्वसंख्या। विलक्षणमहत्त्वे हेतुः। पिंडपरिमाणविशेषे अवयवप्रचयः बहुत्वात् कारणं। स च प्र
शिथिलः संयोगः। घटः पटात् पृथगित्यनुमतसिद्धपृथक्त्वजातिमत् पृथक्त्वं॥ तदपि संख्या
वदेव सर्वद्रव्यवृत्ति एकपृथक्त्वद्विपृथक्त्वत्रिपृथक्त्वादिभेदेनानेकधा। अवयवगतैकपृ
थक्त्वादवयविन्येकपृथक्त्वमुत्पद्यते॥ रूपं रसात् पृथगिति तु भिन्नत्वाद्गौणः प्रयोगः। ननु भेदेनै
व घटात् पटः पृथगिति व्यवहारोपपत्तौ पृथक्त्वाख्यगुणे किं मानमिति चेत्॥ अत्राचार्याः

7

प॰दी॰ ॥७॥ अन्यारादितरर्त्तेति इति व्याकरणसूत्रेण पृथक्त्ववाचकपदयोगे विधीयमानपंचम्यनुरोधेन
तत्स्वीकारः॥ महाभाष्ये ऽन्यइत्यर्थग्रहणमस्तुपेत्यादर्थवाचकेतरादिपदयोगेपि पंचमीसि
द्धिस्तस्य सूत्रे प्रत्याख्यातत्वात्॥ तेदस्यान्यपदार्थतो न विवक्षणे च तद्वाचकपदयोगाविरो
धात्॥ घटादन्यो विलक्षण इत्यादावपि घटो नेत्यत्रापि पंचम्यापत्तेः॥ संयुक्तावित्यनुभवसिद्धसं
योगत्वजातिमान् संयोगः॥ सर्वद्रव्यवृत्तिः॥ स त्रिविधः॥ अन्यतरकर्मजउभयकर्मजसंयोगजश्चेति
क्रियावत्स्थाणोः क्रियावता पक्षिणा सह आद्यः॥ मल्लयोर्मेषयोर्वा द्वितीयः॥ अंगुलीतरुसंयो
गात्कायतरुसंयोगस्तृतीयः॥ सोयं संयोगो द्विनिष्ठः॥ घटपटौ संयुक्ताविति प्रत्ययात्॥ घटे पटस्य
पटे घटस्याप्येक एव संयोगः॥ अन्यथा घटः पटसंयुक्त इतिवत् घटो घटसंयुक्त इत्यपि प्रतीत्या
पत्तेः॥ तथा चैकत्वेपि च संयोग इति मीमांसकाः॥ घटपटौ विभक्ताविति प्रतीतिसिद्धविभागत्व
जातिमान् विभागः॥ स कृत्स्नद्रव्यवृत्तिः॥ संयोगवद्द्रव्यवृत्तिः॥ हिमवद्विन्ध्यौ विभक्ताविति प्रयोगस्तु द
संयोगाभावयोगाद्गौणः॥ त्रैविध्यं पूर्ववत्॥ परत्वजातिमत्परत्वं॥ अपरत्वजातिमदपरत्वं॥ तच्च
द्विविधं कालिकं दैशिकं च॥ आद्यं जन्यद्रव्येष्वेव॥ द्वितीयं मूर्त्तेष्वेव॥ इयत्त्वावच्छिन्नपरिमाणवत्त्वं मूर्त्त राम
त्वमुच्यते॥ तदाश्रयो मूर्त्तं॥ तथा हि॥ युवस्थविरपिंडयोरयमस्माद्बहुतरतपनपरिस्पंदा ॥७॥
श्रयः॥ अयमस्मादल्पतपनपरिस्पंदाश्रय इति बुद्ध्या परत्वापरत्वे जन्येते॥ तदेवं अयमस्मात्प
र इति अयमस्माद… …तपनक्रियाया पुरुषे सर्व
गा

घ घटको महाकालो स्युपेयते ॥ एवं व्यवहितसंनिकृष्टयोः पिंडयोरयमस्मादल्पतरसंयुक्तसंयोगवा
वान् अयमस्माद्बहुतरसंयुक्तसंयोगवानिति ज्ञानादैशिके परत्वापरत्वे जन्येते ॥ तयोरेवायमपरोयं
परइति धीरुत्पद्यते ॥ तत्र तावद्दैशसंयोगसंक्रामिको महादिगभ्युपेयते ॥ गुरुत्वत्वजातिमद्गुरुत्वं ॥ प्र
थमपतनासाधारणकारणं पृथिवीजलवृत्तिः अतीन्द्रियं पतनानुमेयमित्युदयनाचार्याः ॥ अधो
देशावच्छेदेन प्रत्यक्षमेवेत्यादिति लीलावतीकाराः ॥ द्रवत्वत्वजातिमद्द्रवत्वं ॥ पृथिव्यादित्रयवृत्ति ॥ द्वि
विधं ॥ सांसिद्धिकं नैमित्तिकं च ॥ तत्र सांसिद्धिकं जले ॥ करकादौ चादृष्टविशेषाद्द्रुतिभावप्रतिबंधमा
त्रं ॥ वस्तुतो स्त्येव तत्क्षणोत्तरमुपलंभात् ॥ लाक्षासुवर्णादौ चाग्निसंयोगनिमित्तं जायमानमंत्यं ॥ स्नेहः ॥ द्र
संग्रहरूपकार्यानुमेयो गुणः ॥ जलमात्रवृत्तिः ॥ घृततैलादावुपष्टंभकजलभागगतः ॥ बुद्धित्वजा
तिमती बुद्धिः ॥ सा द्विधा ॥ स्मृतिरनुभवश्च ॥ स्मरामीत्यनुभवप्रसिद्धजातिमती स्मृतिः ॥ सा च पूर्वानु
भवजन्यसंस्कारजेति वक्ष्यते ॥ अनुभवामीत्यनुभवसिद्धजातिविशेषोनुभवत्वमित्येके ॥ अनुमित्यादा
वनुभवामीत्यप्रतीतेः ॥ प्रत्यक्ष एव तथानुभवाच्चानुभवसिद्धं अनुभवत्वं प्रत्यक्षत्वमेव प्रकृते तु स्मृ
8 तिभिन्नत्वे ज्ञानत्वमेवानुभवत्वमित्यपरे ॥ सैव बुद्धिर्द्विधा ॥ मिथ्या प्रमा च ॥ असद्विषयिणी मिथ्या शु
क्तौ इदं रजतमिति बुद्धौ शुक्तिरजतत्वयोः प्रसिद्धयोरलीकस्यैव समवायस्य विषयीकरणादिति
वाचस्पतिमिश्राः ॥ आचार्यादयस्तु असतो भानासंभवात् शुक्तौ पैंद्वरजतस्यैव तत्समवायस्या सि
प्यारोप एव ॥ अलीकं न भासत इत्यौं वा क्वापि सचेतसां मूकतैवोचिता स्यात् ॥ तन्मते विशेष्या
संबंधविशेषणविषयकत्वं मिथ्यात्वं घटत्वेन रूपमिवस्यधारणाय विशेष्यावृत्तीति नोक्तं ॥ अ

य दि

प·दी· संबंधत्वं तु तत्र नास्तीति नातिव्याप्तिः। सा त्रिधा। संशयविपर्ययतर्कभेदात्। एकस्मिन् धर्मिणि विरो
॥८॥ धिविषयकनानार्थावमर्शः संशयः। यथा स्थाणौ स्थाणुर्वा पुरुषो वायमिति अत्र पुरुषत्वं तत्सं
बंधश्च तत्र नास्तीति भवत्यस्य सद्विषयत्वं। संशयस्त्रिधा। साधारणधर्मदर्शनजः साधारणधर्मद
र्शनजो विप्रतिपत्तिजश्च॥ स्थाणुपुरुषसाधारणोच्चत्वदर्शनजः आद्यजः। नित्यानित्यव्या
वृत्तशब्दत्वादिदर्शनजः। शब्दो नित्यो वेति द्वितीयः। वादिविरुद्धार्थकवाक्याज्जायमाने सम्मो
द्रव्यं न वेत्यादिस्तृतीयः॥ तदभाववति तत्प्रकारको निर्णयो विपर्ययः॥ यथा शुक्ताविदं रजतमिति
रजतत्वाभाववत्यां शुक्तौ तन्निर्णयोयं भवत्येव। व्याप्यारोपप्रयुक्तो व्यापकारोपस्तर्कः। यद्यय
दि निर्वह्निः स्यान्निर्धूमः स्यादिति॥ वह्न्यभावो व्याप्यस्तदारोपप्रयुक्तो व्यापकधूमाभावारो
प पोऽस्ति। स प्रस्तुसंशयविपर्ययक्षणिकभेदेन दोषवृत्तादिति स्वानुदक्षमिति ग्रहण
मिति नैयायिकाः॥ वैशेषिकास्तु तर्कस्याहार्यविपर्ययत्वात् पृथगगणयन्तः संश
ई यविपर्ययस्वप्नानध्यवसायभेदेनाविद्यां चतुर्विधमाहुः॥ निद्रादोषजन्यं ज्ञानं स्वप्नः। अप्रसि राम
द्धिवस्तुपदार्थदर्शनात् किमेतदिति धीरनध्यवसायः। न चायं संशयः नानाकोट्यनुल्लेखात्॥ ॥८॥
प्रमा च यथार्थानुभवः। अबाधितार्थविषयं ज्ञानं यथार्थं। स्वविषयसंबंधेन विशेषणवद्वि
शेष्यविषयकमित्यर्थः। तथाच परंपरया प्रमात्वं न समवायेन सा च भ्रमप्रत्यक्षामिके वेति वार्त्तिकाः।
३। अनुमितिरपीति के उपमितिरपीति ... व्याप्तिरपीति नैयायिकाः॥

अर्थापत्तिरपीति प्राभाकराः॥ अनुपलब्धिरपीति भाट्टाः॥ संभवैतिह्यरूपाण्यपीति पौराणिकाः॥
एतादृशं प्रमाकरणं च प्रमाणं॥ करणत्वं चासाधारणकारणत्वं॥ असाधारणत्वं च व्यापारव
त्त्वं तथा च चक्षुरादिकमेव प्रत्यक्षादिकरणमित्येके॥ आचार्यास्तु अव्यवधानेन कार्योत्पा
दकत्वमसाधारणत्वं॥ तथा च चक्षुःसंयोगादिकं प्रत्यक्षे करणं॥ लिंगपरामर्शरूपं तृ
तीयज्ञानमेवानुमितावित्याहुः॥ कारणत्वं चान्यथासिद्धिनियतपूर्ववृत्तित्वं॥ यथा घटे दंडा
दिः॥ दैवादागतरासभस्य तंतुरूपस्य च वारणाय क्रमेण पदद्वयमिति प्राचः॥ वस्तुतस्तु नि
यतपदं न देयमेव। रूपवद्रासभस्यान्यथासिद्धत्वेनैव वारणात्। अन्यथासिद्धत्वं चाव
श्यकल्प्यमानपूर्ववर्तिन एव कार्यसंभवे तत्सहचरितत्वं। रासभसत्वेपि दंडचक्रादेराव
१ श्यकत्वात् इतरयमन्यथासिद्ध एवेति तत्त्वं॥ तथा च प्रमाणं चार्वाकमते एकं॥ वैशेषिकाणां
द्वयमित्यादि सिध्यति॥ तथा हि॥ साक्षात्कारो मीतिप्रतीतिसाक्षिकजातिविशेषवच्च ज्ञा
नं प्रत्यक्षं॥ तद्द्विधा॥ नित्यमनित्यं च॥ नित्यं भगवतस्तत्सर्वविषयं प्रमा च॥ अनित्यं जीवानां॥
तद्द्विधा। सविकल्पकं निर्विकल्पकं च॥ आद्यं घटोयं दंडीत्यादिभिः शब्दैरभिलापयोग्यं वि
शेषणविशेष्यवैशिष्ट्यावगाहि वा सविकल्पकं। तत्कारणत्वेन कल्प्यमतींद्रियं विशिष्यशब्दा ल्प
भिलापायोग्यवैशिष्ट्यानवगाहि यथा दंडपुरुषयोर्ज्ञानं दंडविशेषणपुरुषविशे

प.दी.
१८॥

ष्य:॥संयोग:संबंधइतितद्‌वगाहिज्ञानंसविकल्पकं॥तदंडज्ञानमंतरेणनोत्पद्यतइति
दंडज्ञानजन्यं॥यथातथास्तु॥स्थितस्यजायमानेघटइतिज्ञानेघटस्यविशेष्यत्वंघटोविशे
ष्य:समवायसंबंधइतितद्‌वगाहित्वात्सविकल्पकंघटत्वज्ञानजन्यंबोध्यं॥तत्कारणी
भूतंज्ञानंचानुभवानास्पदत्वादतींद्रियंनिर्विकल्पकमभिधीयतइति॥नाभिकल्पनेनिर्विक
ल्पकमेवप्रमा॥अलौकिकघटत्वाद्यवगाहित्वात्स्वलक्षणवस्तुविषयत्वात्॥तच्चसूर्यादिवत्
स्वप्रकाशंननुघटादिवत्परप्रकाश्यंसविकल्पकंतुनप्रमा॥अलीकघटत्वाद्यवगाहि
त्वात्॥वंध्यापुत्रइतिज्ञानवदितिचेत्॥नवेतिवक्ष्यते॥तच्चप्रत्यक्षंपरस्पराभिन्नप्रमित्रा
स्वादेरश्रात्मक्षणोत्सिमंतसान्द्रसत्तामात्रकंरामोतिप्रतीतिसाक्षिकचाक्षुषत्वादिजाति
षट्कभेदात्षोढा॥तत्कारणंचक्षुरादीन्द्रियंषट्कं॥धर्मिणोविषयेणसहसंनिकर्षोव्या
वांतरव्यापार:सोपिचसंयोगसंयुक्तसमवायसंयुक्तसमवेतसमवायसमवायसमवेतसमवा
यविशेषणताज्ञानलक्षणसामान्यलक्षणायोगजधर्मलक्षणाभेदेनबहुधा॥ राम
लौकिका:॥प्रत्येकंत्रयोलौकिका:॥तत्रमनसाज्ञायमानेसुखमित्यादिप्रत्यक्षेमन:करणं॥आ ॥१९॥
त्मसंयुक्तंफलं॥आत्ममन:संयोगोवांतरव्यापार:संबंधइतियावत्॥अन्येतुतज्जन्यसाक्षा
न्यजनको:वांतरव्यापार: ... ज्ञानकमिति॥अप

ष्ये

रः। नचाजन्यशब्दसमवायेऽव्याप्तिः। तस्य व्यापारत्वास्वीकारात्। शब्दस्यैव स्वप्रत्यक्षे व्यापा
रत्वात्। यद्वा। श्रोत्रमनःसंयोग एव शब्दस्य तदसत्ताभावादेश्च प्रत्यक्षे व्यापारः। तस्य श्रोत्रज
न्यत्वात् प्रत्यक्षजनकत्वाच्चेति वदंति। सुखादिग्रहे संयुक्तसमवायः। मनःसंयुक्ते आत्मनि सुख
स्य समवायात्। सुखे समवेतसुखत्वादिग्रहे संयुक्तसमवेतसमवायः। एवं घटादिग्रहे चक्षुषः
स्पर्शनस्य वा संयोगः। रूपादौ संयुक्तसमवायः। रूपत्वादौ संयुक्तसमवे[illegible]ग्रहे तृतीयस्य[illegible]त सम
वायाद् द्रष्टव्यः। द्रव्यप्रत्यक्षमात्रे इंद्रियसंयोगस्य शब्देतरद्रव्यसमवेतग्रहे संयुक्तसमवाय
स्य तत्समवेतसमवेतग्रहे तृतीयस्य हेतुत्वस्य सामान्यतः स्वीकारात्॥ ॥ननु चक्षुषो गोलकवि
शेषरूपस्य घटादिसंयोगः प्रत्यक्षबाधितः कथमासन्निरिति चेन्न। तत्तद्गोलकाधिष्ठिता
10 नामिंद्रियाणामतींद्रियाणामभ्युपगमात्। गोलकादिरूपत्वे चासंबंधग्राहकत्वमभ्युपेयं। त
तथा च पृष्ठभागीयाः पुरोवर्त्तिनो भित्त्यादिव्यवहितांश्च पदार्थान् ग्रहीषेरन्। व्यवधानं प्रतिबंध
कमिति चेन्न। भित्त्यादिपरभागस्थितानां परावृत्त्य वर्त्तिनि पृष्ठदेशस्थस्य च प्रसक्तं न स्यात्। तत्त
द्रूपीयतत्कालिकप्रसक्तं प्रत्येव प्रतिबंधकत्वकल्पने चातिगौरवं। तस्मादावश्यकमतींद्रि
यमिंद्रियं। नन्वेवं शाखाचंद्रमसोः तुल्यकालग्रहणं न स्यात्। किंच नेत्रोन्मीलने प्रहर
द्वयावधि सूर्यचंद्रग्रहणार्थं विलंबापत्तिः। चक्षुषस्तावद्दूरं गमनं कल्पनादिति चेन्न। अति
नौ

विशेषणताघटस्तदा तेन ज्ञहे न सुःसंड ८

प·दी· लाघवादतिशीघ्रंनावकूरगमनाद्विशेषायहस्याश्रुतदुर्स्पर्शप्रतीतिश्चोपपत्तेः॥ तदुक्तं अदित्सो
॥२०॥ हितेजसोलाघवातिशयेनवेगातिशयोयथाचीनाचलचूडावलंबिन्येवभगवतिमयूखे
मालिनिभवनोदरेषु आलोकइससिमालोलौकिकानामितिदिक्॥ समवायेनशब्दग्रहः
श्रोत्रसमवायस्य शब्देसत्वात्॥ शब्दत्वादिग्रहे समवेतसमवायः॥ विशेषणतयाऽभावग्र
हः शब्दोनास्तीतिश्रोत्रेशब्दाभावस्य विशेषणतासत्वा। भूतलादौ घटाभावग्रहे चक्षुःसंयु
क्तसवेतविशेषणतेत्यादि द्रष्टव्यं॥ कवेःकाव्यरचनामूल ते विशिष्टज्ञानेमनसाज्ञा
यमानेविशकलितपदार्थस्मरणरूपज्ञानंसन्निकर्षः॥ अन्यथातत्रसन्निकर्षाभावेनातीं
द्रियातीतानागतपदार्थवैशिष्ट्यज्ञानासंभवात्॥ घटत्वसामान्यलक्षणप्रत्यासत्यानाना
नव्यवहितसकलज्ञानोत्पत्तौसामान्यप्रत्यासत्तिः॥ अन्यथाएतादृशो घटपदवाच्यइत्येकत्र
बाधितेसर्वत्रघटेशब्दोनस्यात्॥ आगमाश्रमापितं सुक्ष्मीनइवकुरहस्यादिमियुक्तो
त्यायोगिभिः सर्वसाक्षात्कारजन्ययोगाभ्यासेनजातोऽदृष्टविशेषप्रत्ययोगजधर्म
इत्युच्यते॥ ॥अथानुमानंनिरूप्यते॥ ॥अनुमनोभीत्यनुभवसाक्षिकज्ञानविशेषवस्या
नुमितिः॥ तत्करणमनुमानं॥ तच्चज्ञायमानंलिंगमितिप्राञ्चः॥ तथाहि॥
यद्धर्मावच्छिन्नसमाना [illegible] विशिष्टसधर्मविकरण

२ (ज्यं:) नाधिकरणातित्वाप

विशिष्टतत्तद्धर्मवत्त्वं व्याप्तिः॥ तदाश्रयो धूमादिर्लिंगं॥ तस्मिंल्लिंगे यत्र धूमस्तत्र सर्वत्र वह्निरिति
भूयोदर्शनात् धूमत्वावच्छिन्नसमानाधिकरणाः सर्वे महानसत्वादयो वह्नित्वावच्छिन्नसमा
नाधिकरणास्तादृशवह्निसामानाधिकरण्यविशिष्टधूमत्ववान् धूम इति व्याप्तिज्ञानं प्र
थमं जायते। ततो पूर्वपर्वते पुनः धूमदर्शनं द्वितीयं ज्ञानं जायते॥ ततो वह्निव्याप्यधूमवानयमि
ति तृतीयं ज्ञानमुत्पद्यते। तदेव लिंगपरामर्शः॥ तत्र लिंगपरामर्शत्वेन परामृश्यमानं लिंग
त्वेन वा कारणतेत्यत्र विनिगमकाभावादुभयमपि द्वारद्वारिभावेन हेतुर्लिंगं करणं परामर्शो
तु र्शो द्वारं॥ व्याप्तिज्ञानं परामर्शविशेषणज्ञानत्वेनोपयुज्यते। ततो यं पर्वतो वह्निमानिति सा
– ध्यवह्निविशिष्टज्ञानरूपानुमितिर्भवतीति॥ ॥मणिकारास्तु॥ अतीतानागतलिंगेना
मिति प्यनुदर्शनान्न लिंगस्य करणत्वं। किंतु व्याप्तिज्ञानं करणं परामर्शो व्यापार इत्याहुः॥ स्मर
ष्ट णात्मकपरामर्शादसन्निकृष्टहेतुके प्यनुमितेस्तत्र व्याप्तिज्ञानस्य पूर्वपरामर्शात्तज्जन्यसंस्का
रे व्यवधानान्न करणत्वं संभवतीति संस्कारसाधारणपरामर्शजनकत्वेनैवानुमितिकरण
तेति नव्याः॥ ॥जनकत्वं हि कारणत्वं तच्चानन्यथासिद्धनियतपूर्ववृत्तित्वं पूर्ववृत्तित्वं च प्राग
भावावच्छिन्नसमयवृत्तित्वमतिगौरवग्रस्तमिति न तेन रूपेण करणता॥ किंतु मन एवानु
मितिकरणं॥ परामर्शो व्यापारः॥ उक्तं च प्रमेयभाष्ये॥ स्मृत्यनुमित्यादिकरणत्वेन मनः

साधितमिति नव्याः॥ ज्ञानत्वेनैवानुमितिकरणता। परामर्शो विशेषकारणमिति नातिप्रसंग
इत्यपि केचित्॥ नव्यास्तु विग्रहे सति महानस एवानुमीयतां॥ वह्निव्याप्यधूमवानयमिति परा
मर्शस्य तत्रापि संभवादिति वाच्यं॥ पक्षताया अप्यनुमितिहेतुत्वात्॥ अनुमितीच्छाभाववि
शिष्टसाध्य[illegible]निर्णयाभावो हि पक्षता[illegible] महानसादौ चानुमितीच्छाविरहे सति तत्र साध्य ह४
निर्णयोस्तीति न पक्षता। तत्रैवानुमितिर्भवतीति। इच्छायां पक्षतासंपत्तये अनुमितीच्छाभावविशिष्टे
ति विशेषणं। तथा च पुरुषे सत्यपि दण्डाभावाद्दण्डी पुरुषाभाववत् साध्यनिर्णये सत्यपि इच्छा
विरहरूपविशेषणाभावात् तादृशनिर्णयाभावरूपा पक्षता भवति। साध्यसंदेहः पक्ष
ध्ये ता। तदुक्तं भाष्ये॥ नानुपलब्धे न निर्णीतेर्थे न्यायः प्रवर्तते अपि तु संदिग्धेर्थ इति मते तत्रानु
मितिर्न स्यादित्येतन्न युक्तं॥ अयं धूमो वह्निव्याप्यो धूमवांश्च पर्वत इति ज्ञानद्वयमेव हेतुर
कं स्तु कुतः परामर्शोपीति मीमांसकं दूषयति कोटयो मतेषु कं॥ धूमो वह्निव्याप्यः आलोकवा
न्पर्वत इति ज्ञानादप्यनुमित्यापत्तेः॥ धूमे व्याप्तेः आलोके पक्षधर्मतायाश्च ज्ञानस
त्वात्॥ न चैकत्र द्वैतोभयावगाहिज्ञानं कारणमिति वाच्यं॥ धूमो वह्निव्याप्यः द्रव्यवान्पर्वत
नाह्य इति ज्ञानादनुमित्यापत्तेः द्रव्यत्वेनैव धूमस्य पक्षधर्मतावगाहनात्॥ न चैकेन धूमत्वरूपेण तन
व्याप्तिपक्षधर्मताज्ञानं हेतुः। वह्निव्याप्यवान्पर्वत इत्यागमवाक्यात्परामर्शादनुमित्यना॥२२॥

पर

पत्तेः॥ तस्मात्परामर्श एवानुमापकः॥ ॥सोयं परामर्शो व्याप्तिज्ञानक्रमेण स्वस्यैव यत्रो
त्पन्नः अनुमितिरपि स्वस्यैव तत्स्वार्थानुमानं॥ यत्र तु स्वयं बुद्ध्वा शब्देन परं बोधयति तत्प
रार्थानुमानं॥ तत्र प्रतिज्ञाहेतूदाहरणोपनयनिगमनाख्याः पंचावयवाः॥ तत्र पर्वतो वह्नि
मानिति साध्यविशिष्टपक्षबोधकवचनं प्रतिज्ञा॥ कुत इत्याकांक्षाशामकं धूमादिति पंच
म्यंतलिंगवचनं हेतुः॥ धूमोस्तु वह्निर्मास्त्वित्याशंकाशामकं यत्र धूमस्तत्राग्निर्यथा म
हानस इत्यादि सव्याप्तिकं दृष्टांतवचनमुदाहरणं॥ हेतूदाहरणाभ्यां पर्यवसितव्याप्ति
न विशिष्टपरामर्शजनकं तथा चायं वह्निव्याप्यधूमवानयमिति वा उपनयः॥ पक्षे साध्योपसं अ
हाररूपं तस्मात्तथेति वाक्यं निगमनं॥ एत एव प्रतिज्ञापदेशनिदर्शनानुसंधानप्रत्याम्नायश
ब्देन वैशेषिकैरुच्यंते॥ अपदेशो हेतुः॥ शेषं क्रमेण ज्ञेयं॥ ॥मीमांसकाः॥ [illegible]त्रीण्येवावयवाः प्रयो का६
12 ज्या उदाहरणांता उदाहरणाद्या वा इत्याहुः॥ न च परार्थानुमाने शब्दबोधात्मक एव साध्यनिर्णये
त्वानुमितिरिति वाच्यं॥ वादिवाक्यस्याप्रामाण्यशंकास्कंदितत्वेन निर्णयाजनकत्वात्॥ पंचाव
यवपूर्वमनंतरं मनसा बाधकाभावप्रतिसंधाने संवादिकारितव्याप्तिज्ञानादिवशान्मनसपरामर्शा
नंतरमनुमितिसं[illegible]पगमादिति दिक्॥ तदिदं लिंगं त्रिधा॥ केवलान्वयि केवलव्यतिरेकि अ
न्वयव्यतिरेकि चेति॥ [illegible]ताभावाप्रतियोगि साध्यसाधकं हेतुः केवलान्वयी

ति २

प॰दी॰ ॥१२॥ यथेदं वाच्यं ज्ञेयत्वात् द्रव्यत्वात् गुणत्वादित्यादि। अन्वयगतसाध्यसाधर्म्यसहचारो हेतुः केव
लव्यतिरेकी॥ यथा आकाशः पृथिव्यादिभ्यो भिद्यते शब्दत्वादिति। अत्र शब्दस्य पृथि
व्यादिभेदे साहचर्यं न क्वापि दृष्टं। किंतु अत्रेतरत्र शब्दो नास्तीति इतरभेदाभावशब्दा
भावयोरेव सामानाधिकरण्यमवगतं। अतो व्यतिरेकयोः साध्याभावहेत्वभावयोरेव व्या
प्तिग्रहात् केवलव्यतिरेकी। न च शब्दे हेतौ व्याप्त्यग्रहादितरभेदे व्याप्यशब्दवानयमिति प
रामर्शासंभवेन कथमनुमितिरिति वाच्यं। ययोरभावयोर्व्याप्तिर्विना बाधकं तयोरपीति
तर्कसहकृतमनसा हेतावपि साध्यव्याप्तिग्रहे परामर्शसंभवात्॥ यद्वा साध्याभावव्या
पकाभावप्रतियोगिहेतुमानयमित्येव व्यतिरेकिणि परामर्शः ततोनुमितिरिति॥ यत्र सा
ध्यहेत्वोस्तदभावयोश्च व्याप्तिर्गृह्यते सोऽन्वयव्यतिरेकी॥ यथा यत्र धूमस्तत्र वह्निः य
व त्र वह्न्यभावस्तत्र धूमाभाव इति उभयत्र सहचारग्रहात् धूमसहचरिताः सर्वे वह्निसहचरि
ताः वह्न्यभावसहचरिताः सर्वे धूमाभावसहचरिता इति ग्रहद्वयमावि। न व्याप्तिबोधनप्रकार
स्तु प्राचीनैरुक्तः॥ अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते॥ साध्याभावोऽन्यथा॥ राम॥
व्याप्यो व्यापकः साधनास्त्ययः॥१॥ व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परं। एवं परी ॥१२॥
दिता व्याप्तिः स्फुटीभवति तत्त्वत इति॥ तत्रान्वयव्यतिरेकिणि पक्षधर्मत्वं सपक्षे सत्त्वं। वि

पक्षसत्वाद्यारतिरबाधितविषयत्वमसत्प्रतिपक्षत्वं इति पंचरूपाणि अपेक्षितानि। केवलव्यतिरेकिणि
सपक्षाभावाचात्तद्भिन्नानि चत्वारि। केवलान्वयिनि विपक्षाभावाद्विपक्षव्यावृत्तिभिन्नानि चत्वारि॥
अत्र पक्षतावान्पक्षः पर्वतादिः। निर्णीतसाध्यहेतुसहचारकः सपक्षः। निर्णीतसाध्याभावको विपक्षः। धर्मी
विषयः साध्यं तस्याबाधितत्वं बाधाभावो यस्य हेतोस्तत्त्वं। सत्प्रतिपक्षः साध्याभावसाधको हे
तुस्तदभावोऽसत्प्रतिपक्षत्वं। एतादृशरूपपंचकशून्या हेतुवद्भासमानत्वाद्धेत्वाभासाः॥ ते च सिद्धविरुद्धा
नैकांतिकप्रकरणसमबाधिताः पंच। तत्रासिद्धस्त्रिधा। आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वा
सिद्धश्च। यत्र पक्षतावच्छेदकं पक्षे नास्ति स आद्यः। यथा गगनारविंदं सुरभि अरविंदत्वा
त्सरोजारविंदवत्॥ अपक्षतावच्छेदकं गगनीयत्वं प्रसिद्धं अरविंदे पक्षे नास्तीत्याश्रयासिद्धत्वं।
पक्षे हेतुस्वरूपाभावः स्वरूपासिद्धः। यथा जलं रसवत् गंधवत्त्वादिति। व्याप्यत्वाभावो व्या
13 प्यत्वासिद्धः। यथा पर्वतो वह्निमान्नीलधूमादिति। अत्र नीलत्वस्य व्यर्थत्वेन व्यर्थविशेषणता
त्दवच्छेदेन व्याप्यत्वाभावाद्व्याप्यत्वासिद्धः। साध्यव्यापकाभावप्रतियोगी हेतुर्विरुद्धः। वह्निमा
न नूर्द्धदत्वाद्गगनाद्वेति यथा व्यभिचार्यनैकांतिकः। प्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्वं।
साध्यासामानाधिकरण्यधर्मसामानाधिकरण्यं वा व्यभिचारः। तद्वान्व्यभिचारी॥ स त्रि
धा। साधारणोऽसाधारणोऽनुपसंहारी च। विपक्षवृत्तिः साधारणः। यथा पर्वतो धूमवा
न्वह्नेरिति। विपक्षे अयोगोलके सत्त्वात्। सपक्षविपक्षव्यावृत्तोऽसाधारणः। यथा शब्दो नित्यः

प॰दी॰ शब्दत्वादिति सपक्षे गगने विपक्षे घटादौ च हेतुर्नास्त्येव । अतो व्यतिरेकव्याप्त्या साध्यवदभावसा
॥१३॥ धकत्वाविशेषात्संदेहापादकत्वाद्दूषणमिदं ॥ अहेतिसाध्यकोऽनुपसंहारी । आकाशवान्धूमादि
ति यथा ॥ तुल्यबलसाध्याभावसाधकहेत्वन्तरपक्षः सत्प्रतिपक्षः ॥ यथा शब्दोऽनित्यः कृतक
त्वाद्घटवत् । शब्दो नित्यः व्योमवद्गुणत्वात् तत्परिमाणवदिति ॥ पक्षे साध्याभावनिर्णयो
बाधस्तथाविधो बाधितः ॥ यथा उत्पत्तिकालीनो घटो गंधवान् पृथिवीत्वादिति । तत्र प्रमा
णांतरेण गंधाभावनिर्णयाद्बाधितः ॥ एतेषां सत्प्रतिपक्षौ साक्षात्कारे विषयापहरणदशायाम
व हेतोराभासत्वापादकत्वादनित्यदोषौ । साक्षादनुमितिप्रतिबंधकौ च ॥ यदा तु तर्कादिना
मानांतरेण व्याप्त्यादिकं निर्णीतं तदा नाभासाश्रयासिद्ध्यादीनामाभासत्वं दोषाज्ञापनाद्वा ।
शेषास्तु नित्यदोषाः बाधान्ये व्याप्त्यादिविघटकाश्चोत्पत्तिजनकज्ञानविषयकत्वेन दोषा इति
नैयायिकाः ॥ ॥ वैशेषिकास्तु ॥ ॥ विरुद्धासिद्धसंदिग्धास्त्रयो हेत्वाभासाः ॥ विरुद्धासि
द्धसंदिग्धमलिंगं काश्यपोऽब्रवीदिति भाष्यात् । अनेनासिद्धविरुद्धसंदिग्धानध्यवसितानां
मनपदेशत्वमुक्तं भवतीति अपि भाष्यव्याख्यातारो । तन्नासिद्धश्चतुर्धा उभयासिद्धोऽन्यतरासिद्धः
श्री स्वरूपासिद्धस्तूभयासिद्धश्च । शब्दो नित्यः सावयवत्वादित्युभयासिद्धः । कार्यत्वादिति द्वितीयः । अन्यतरासिद्धः
दानित्यश्चाक्षुषत्वाद्बाधितः तृतीयः । विरुद्धः प्रागुक्त एव । साधारणो नैकांतिकः साध्यतद् शम
भावसहचारित्वादुभयसंदेहजनकत्वात्संदिग्धः । शब्दो नित्यः शब्दत्वादित्यनध्यवसितः । साधारण ॥१३॥
धर्मदर्शनाद्विप्रतिपत्तेश्च संशयः प्राचीननैयायिकमतेनाभासवादिसाङ्गः हेत्वाभासा नामे

ते

कज्ञानेन्यस्याज्ञानेनुमानदूषणासंभवात्सर्वेपिस्वातंत्र्येणदूषणानितेनकश्चित्कोसंमिलने
पिनैकेनापरान्यथासिद्धिःसंकरो॥व्यभिचारोन्नायकत्वेनपरंपरोपयोगान्नहेत्वाभासांतरंउपाधिः॥
यद्धर्मविशिष्टसाध्यव्यापकत्वंतद्धर्मविशिष्टसाधनाव्यापकत्वंचतोल्लक्षणं॥अस्तीदंधूमवा
न्वह्नेरित्याद्रेंधनेभवतिहिद्रव्यत्वविशिष्टोयत्रधूमस्तत्रतत्राद्रेंधनद्रव्यत्वविशिष्टोयत्रवह्निस्तत्र ग
नास्तीतिद्रव्यत्वविशिष्टसाध्यव्यापकंतद्विशिष्टसाधनाव्यापकंच॥एवंगर्भस्थोमित्रातनयत्वाद्यथा
ऽ:मित्रातनयत्वात्॥पूर्वोत्पन्नवदित्यत्रशाकपाकजत्वमुपाधिः॥अत्रापिमनुष्यत्वावच्छिन्नंय
त्रयत्रश्यामत्वंतत्रशाकपाकजत्वं॥मनुष्यत्वावच्छिन्नंयत्रमित्रातनयत्वंतत्रशाकपाकजत्वंनास्ती त्रा
ला तिलक्षणसमन्वयः॥एवंवायुःप्रत्यक्षःप्रमेयत्वादित्यत्रापिबहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकत्वंत
दवच्छिन्नसाधनाव्यापकमुद्भूतरूपवत्त्वमुपाधिरित्यलंपल्लवेन॥नन्वनुमानेनप्रमाणं॥
नाप्यनुमितिःप्रमांतरं॥यत्रधूमस्तत्रवह्निरितिभूयोदर्शनात्धूमवतानेनपर्वतेनप्रायेण
वह्निमताभाव्यमितिसंभावनातएवानुमितिकार्यनिर्वाहादितिचेन्न॥वह्निमनुमिनोमीत्यनुभूयमा
न जातिविशेषस्यतदाश्रयानुमितेस्साक्षात्कारत्वेनानुभूयमानपरामर्शस्यचापलपितुमश
क्यत्वात्॥तत्रैवप्रत्यक्षाविषयत्वात्प्रसक्तिजातंज्ञानंप्रमेतिप्रमात्वग्रहश्च॥विनाबाधकंतदन्यथा
त्वस्यकल्पयितुमशक्यत्वादितिदिक्॥ ॥उपमिनोमीत्यनुभवसिद्धजातिविशेषवत्युपमितिः॥
तत्करणमुपमानं॥तच्चगवयादिसादृश्यविशिष्टपिंडज्ञानंगवयधर्मविशिष्टपिंडज्ञानंवा॥तद्यथा॥ग
असाधारणधर्मविशिष्टपिंडज्ञानंच॥

14

प·दी· गवयादिशब्दाः कश्चित्काकोऽयमिति ज्ञानमात्र कीदृग्गवय इत्यारण्यकेन पृष्टे गोसदृशो गवय इति तेन
॥१८॥ निवेदिते कालांतरेऽरण्यं गतस्य तत्पिंडदर्शनात् गोसदृशोऽयं पिंडः एतादृशश्च गवयशब्दार्थ
इत्याप्तेनोक्तं तस्मादयं गवयशब्दवाच्य इत्युपमितिर्जायते। तत्र गोसादृश्यपिंड इति सादृश्य
विशिष्टपिंडज्ञानं करणं। वाक्यार्थस्मरणमवांतरव्यापारः। उपमितिः फलं। एवं कीदृशोऽश्व इ
ति पृष्टे गवादिवद्द्विशफः स्वल्पपुच्छश्चेत्याप्तेनोक्तेऽनंतरं तत्पिंडदर्शनादयं द्विशफः स्वल्पपुच्छ
श्चेति ज्ञानादयमश्ववाक्यार्थस्मरणानंतरमयमश्वशब्दवाच्य इत्युपमितिज्ञानमुत्पद्यते। तत्र वै
धर्म्यविशिष्टपिंडज्ञानं करणं वाक्यार्थस्मरणं व्यापारः शक्तिज्ञानं फलं। एवं कीदृश उष्ट्र इति प्रश्ने
कंटकाशी अतिदीर्घग्रीवः इत्याप्तवाक्यश्रवणानंतरं कालांतरे तद्धर्मविशिष्टपिंडदर्श
नाद्वाक्यार्थस्मरणे सति उष्ट्रशब्दवाच्योऽयमिति वाच्यवाचकभावग्रहो भवति। सा चोप
मितिः फलं। धर्मविशिष्टधर्मिप्रत्यक्षं करणं वाक्यार्थस्मरणं व्यापारः। एवं कीदृश्योषधी
सर्पविषहंत्रीति प्रश्ने नकुलदंष्ट्राग्रेनेत्याप्तोक्तिः ते कालांतरे नकुलदंष्ट्राग्रामोषधिविशेषदर्शने ल
सति एतादृशी सर्वविषहंत्रीति ज्ञानमुत्पद्यते। तत्रैतादृशी विषहंत्रीति ज्ञानं फलं वाक्यार्थस्म
रणमवांतरव्यापारः। नकुलदंष्ट्राधरणरूपासाधारणधर्मविशिष्टपिंडज्ञानं करणमित्यूह्यं। राम
ह एवं चोपमानत्वावच्छेदेन शक्तिग्राहकत्वमिति प्रतारणं परास्तं। न चाप्तवाक्यस्मरणक्षो ॥१८॥
द्बोध एवास्तु कुतः पृथगुपमानप्रमाणाभ्युपगम इति वाच्यं। शरीरस्थ यष्टि लोष्ठ्वादिज्ञाति

यद्रोषरूपेण शब्दाच्छक्तिबोधासंभवात्॥ सादृश्यमवच्छेदकीकृत्यैव वाक्यस्य बोधकत्वात्॥ उ
पमिनोमीत्यनुव्यवसायश्चेति नैयायिकाः॥ वैशेषिकास्तु॥ अयं गवयशब्दवाच्यः गोसदृशत्वात्।
इत्यनुमानात् तद्ग्रहः॥ आप्तवचनाच्च तथा व्याप्तिग्रहात्॥ उपमिनोमीत्यनुव्यवसायश्च संदिग्धः॥
सत्त्वे वा अनुमितित्वव्याप्यमेव तदस्तु॥ तथा च न पृथक् प्रमाणमित्याहुः॥ ॥शाब्दं प्रत्येमीत्यनु
भवसिद्धं शाब्दत्वजातिमती शाब्दी॥ तत्करणं शब्दः प्रमाणं॥ तथा हि॥ घटं नय पटमानये
त्यादिप्रयोज्यप्रयोजकवाक्यं श्रृण्वतो बालस्यावापोद्वापाभ्यां घटपटादिव्यवहारं पश्य
३ तस्तद्व्यवहारेण तदीयं ज्ञानमनुमिसंतस्तज्ज्ञानकत्वान्वयव्यतिरेकाभ्यां शब्दमव
गच्छतो असंबद्धस्याबोधकत्वात् संबंधोस्तीत्यनुमितिर्भवति॥ स च संबंधः शक्तिरुच्यते।
एवमुपमानात्कोशादिभ्यस्तदनंतरमन्यत्रापि तद्ग्रहः॥ एवं घटादिपदशक्तिग्रहे सति गृहीत
शक्तिकपदस्य पदार्थोपस्थितावाकांक्षायोग्यतादिसहकारिवशाच्छाब्दप्रमा जायते॥ स
15 फलं॥ पदान्येव ज्ञायमानानि करणानि॥ पदज्ञानं वा करणं पूर्ववत् पदजन्यपदार्थोपस्थि
तिरवांतरव्यापार इत्यूह्यं॥ ॥ननु गवादिपदानां वृद्धव्यवहारे सन्निहितगव्येव शक्तिग्रहे पि
देशांतरीयापूर्वगोबोधः कथं॥ तत्र शक्त्यग्रहात्॥ अन्यथा गोशब्दादश्वबोधापत्तिरिति चेन्न॥
सामान्यलक्षणाप्रत्यासत्त्या सकलगोव्यक्तेः शक्तिग्रहसमय एवोपस्थितौ सर्वत्रैव जात्यादिवि
शिष्टतद्ग्रहेण दोषाभावात्॥ तथा च न्यायसूत्रं॥ व्य[illegible]स्तु पदार्थ इति॥ एकवचनेन

१ प.दी. विशिष्टशाब्दबोधं सूचयति॥ मीमांसकास्तु॥ गोत्वे एव शक्तिः तदाश्रयैतेन लक्षणया व्यक्तिबोध
॥ ॥१५॥ इसाकं गवये वशक्तिर्न तु गोत्वे पिगोरवात्॥ नापि गोत्वे एव शक्तिर्गवि लक्षणेति युक्तं॥ ग्रामान
यत्यत्रैव वृत्तिद्वयकल्पने गौरवात्॥ ननु चैवं गोपदात्कोत्वबोधो न स्यादिति वाच्यं॥ कार्यत्वेपि
घटत्वस्य कार्यतावच्छेदकत्वात् कार्यत्वसंबंधेन दंडात् घटोपस्थितौ घटत्वभानवदत्राशक्यत्वेपि शाक्य
तावच्छेदकत्वाद्गोत्वादुपस्थितिः संभवादिति वैयाकरणाः॥ नन्वेवमपि गोः शुक्लत्यादौ पदार्थयोर
भेदरूपान्वयानबुद्ध्येत॥ तत्र शाब्दाभावात्॥ अशाब्दस्याप्युपस्थितौ घटादिरूपतत्र बुध्येतेति चेत्॥ स र
सं॥ अशाब्दस्याप्यनयस्याकांक्षायोग्यतानैवयाकभानसंभवात्॥ न च्यादि॥ यत्पदं यत्पदार्थेन सह का
यादृशान्वयबोधजनकं तत्पदं स्वतेन समभिव्याहारस्तादृशबोधेऽपेक्षा॥ घटादिपदं चिरूढविभ को
क्तिरहितप्रातिपदिकार्थेन सहाभेदान्वयमेव बोधयति॥ द्वितीयार्थकर्मत्वादिसिद्धनिरूपकत्वमात्र
आश्रयीभावं वा॥ अतस्तादृशपदसमभिव्याहारो भवत्याकांक्षा॥ एतद्ज्ञानं च कारणं॥ घटपदं द्विती
याद्यर्थेन सह स्वार्थाभेदान्वयबोधकमिति ज्ञानं च तौ चैवाकांक्ष[illegible]तथोन्वबोधात्॥ अन्वयस्याभा
वाद्य॥ एवं योग्यता एकपदार्थे परपदार्थस्य अर्कृत संसर्गवत्त्वं तेन पयसा सिंचतीति योग्यं पय ४ स्य
सि सेककरणत्वसत्वात्॥ वह्निना सिंचतीति न योग्यं तत्र सेककरणत्वाभावात्॥ देवदत्तो गौरित्यत्र दे
वदत्ते स्वामिरूपसंबंधसत्वाद्योग्यता पतेः॥ प्रकृते युक्तं॥ तथान्यपक्षत्वावाक्यैः प्रतिपाद्यः संबंधस्ता राम
दृत्तमित्यर्थः॥ स चात्राभेदः स त्वनास्तीति न तद्योग्या॥ पदनासत्तिः पदजन्यपदार्थोपस्थितिरव्यवधानः ॥१५॥

प्रत्यक्षेण तंडुलदर्शनात्संभवतीत्येवोक्ते तंडुलं पचतीति न बोधः॥ पदाव्यवधानमासत्तिरिति प्राचीनमते न युक्तो
गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यत्र योजनयान्वयबोधानापत्तेः योजनावाक्यादेवान्वयबोध इति चेन्न। प्रथम
वाक्यस्याबोधकत्वप्रसंगात्। योजनावाक्यं च तात्पर्यग्राहकत्वेन प्रकरणादिवदुपयुज्यते॥ एवं चाकांक्षा
योग्यतासत्तिवशात्पदार्थानां परस्परविशेष्यावगाहिविशिष्टशाब्दबोधसंभवान्नानुपपत्तिरिति दि
क्॥ मीमांसकास्तु॥ कार्यान्विते पदानां शक्तिः॥ तथाहि॥ प्रयोज्यप्रयोजकयोरानयननयनादिव्यवहारं पश्यं
तो बालस्यानयननयनादिकार्यत्वेन ज्ञात्वाहं प्रवर्तेते एवमयमपि तथात्वेन ज्ञात्वा प्रवृत्तस्तज्ज्ञानं च शब्दादिति शब्द
स्तद्विशिष्टशक्त इति प्रथमं शक्तिग्रहात्॥ तथा च कार्यतासामान्यस्य सर्वशब्दादवगमेऽपि विशेषतस्तदुपस्थि
तिं विना बोधपर्यवसानाभावादबोधकत्वमेव तच्छून्यानामर्थवादवाक्यवेदांतवाक्यानामित्याहुः॥ ॥
वेदांतिनस्तु॥ ॥ अन्विते पदानां शक्तिरित्यन्वयांशबोधोपपत्तिः॥ ननु कार्यत्वांशे सर्वपदानां शक्तिः॥ तस्य वि
शेषतस्तद्बोधकपदादेवोपस्थितिसंभवेन व्यर्थगौरवग्रासात्॥ अतः कार्यत्वांशं विनापि मोक्षरूपमहा
प्रयोजनवदात्मस्वरूपबोधजनकत्वाद्वेदांताः प्रमाणमेवेत्याहुः॥ पदानां पदार्थेष्विव वाक्यस्य संसर्गरूपेऽ
पि शक्तिः॥ अत एव तस्य वाक्यस्यार्थ इति किंवदंती संगच्छतीति वैयाकरणाः॥ व्युत्पादितं चास्माभिर्मतांतर
निराकरणपूर्वकमेतन्मतं वैयाकरणभूषणे॥ नन्वेवमपि गंगायां घोष इत्यत्र गंगापदात्तीरप्रत्ययः कथं॥
तत्र गंगापदशक्त्यभावादिति चेत्॥ सत्यं॥ लक्षणारूपवृत्त्यंतरात्तदुपस्थितेः॥ अथ केयं लक्षणा॥ उच्यते॥
शक्यसंबंधो लक्षणा॥ गंगापदशक्यो गंगाप्रवाहः तत्संबंधस्तीरेऽस्त्येव॥ तथा च स्वशक्यप्रवाहसंयोग
रूपसंबंधेन गंगापदात्तीरोपस्थितिः॥ स्वशक्येन सहानियमरूपा व्याप्तिरेव लक्षणा॥ तदुक्तं॥ अभिधेया

16

प॰ दी॰ विनानुपपत्तिर्लक्षणेत्यन्ये इति मीमांसकाः ॥ तन्न ॥ मञ्चाः क्रोशन्तीत्यत्र मञ्चपदस्य मञ्चस्थपुरुषे लक्षणा
॥२६॥ न स्यात् ॥ मञ्चपुरुषयोर्व्याप्त्यभावात् ॥ एवं यष्टीः प्रवेशयेत्यत्रापि द्रष्टव्यम् ॥ ॥ वैयाकरणास्तु ॥ ॥
गंगादिपदानां तीरादौ शक्तिरेव । सर्वेषां पदानां प्रायः सर्वार्थेषु शक्तेः । लक्षणा च स्वतन्त्रवृत्तिर्नास्त्यु
पेयेत्याहुः ॥ प्रपंचितं चैतद्वैयाकरणभूषणे ॥ ॥ ननु संकेतः शक्तिः ॥ अभिधानात्मकं पदार्थान्तरं संकेतेन
ग्राह्यमिति मीमांसकाः ॥ सिद्धान्तस्तु घटपदाद्घटो बोद्धव्य इतीश्वरेच्छारूपः संकेत एव ततः शक्तिः सा
च पूर्वोक्तरीत्या वृद्धव्यवहाराद्ग्राह्या बालानां वृद्धेभ्य इति । इत्यादौ दृश्यमानञ्च इति । आधुनिक
पुत्रादिषु संकेतितदेवदत्तादिपदे च पित्रादिसंकेतात् ग्राह्या । द्वादशेऽहनि पिता नाम कुर्यादिति शा
स्त्रसिद्धसंकेतात् आपि सास्त्येवेति दिक् ॥ एवं शाब्दबोधे तात्पर्यज्ञानमपि हेतुः ॥ अन्यथा सैंध
वमानयेत्यत्र भोजनप्रकरणे लवणतात्पर्यग्रहे सति अश्वबोधप्रसंगात् । न च शुकादीनां तात्पर्या
भावे तत्र शब्दाद्बोधो न स्यात् इति वाच्यम् ॥ तत्रापीश्वरतात्पर्यसत्त्वात् । तच्च तात्पर्यं वेदे मीमांसा
न्यायगम्यं नियतं । लोके तु वक्तुरिच्छाधीनमनियतम् अत एकस्मादेव शब्दात् क्षेपादिना कोषेऽनेकार्थ
बोधः । यथा श्वेतो धावतीत्यादौ ॥ ननु गमपि गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः । ममापि जन्म त
त्रैव भूयाद्यत्र गतो भवान् ॥ इत्यत्र तत्र गमने सति वियोगात् प्राणहानिरिति प्रतीतिः कथमिति चेत्र । व्यंग्य राम
ज्ञानाख्यवृत्त्यन्तरात्तद्बोध इत्यालंकारिकाः ॥ एवं गतोऽस्तमर्क इत्यादिवाक्येऽपि नानाविधास्तत्पुरुषीय ॥१६॥
बोधा एवमेव संगच्छन्त इति ॥ तार्किकास्तु अनुमितिरूपाः तेनैव पावाद्यादीन बोधाः संभवन्तीति

व्यंजनाख्यवृत्त्यंतरकल्पनां न सहंते। नन्वेवमपि भाषाशब्देभ्यः कथमर्थबोधः तत्र शक्तिलक्षणयोरभावा
दिति चेन्न। तैः संस्कृतस्मरणं ततो बोध इत्यभ्युपगमादिति केचित्। संस्कृतकथामप्यविदुषां बो
धान्नैवं किंतु तेष्वेव शक्तिभ्रमाद्बोध इति नव्याः। संस्कृतवद्भाषाशब्दा वाचका एवेति वैयाकरणमतं नु
भूषणे ऽस्माभिः प्रपंचितं एवं च भाषाव्यावृत्तं हि निमित्तमेव साधुत्वमिति मीमांसकादिमतं। अर्थविशेषव्या
करणव्युत्पाद्यत्वात् दिति तु नैयायिकाः। साधून्नेव प्रयुंजीतेति वचनसिद्धं पुण्यजनकत्वं तदिति वैयाक
रणाः इत्यलं पल्लवेन। नन्वेवमपि पदज्ञानमेव न संभवति। वर्णसमूहः पदं। वर्णाश्च क्रमिकाद्द्विक्षणा
वर्णो श्च॥ तथा च द्वितीयोच्चारणसमये पूर्वो नष्ट इति कथं समुदायज्ञानं। यत्तु प्रत्येकं तत्तद्वर्णानुभवो
त्तरमंत्यसमूहालंबनरूपं सकलवर्णस्मरणमेव पदज्ञानमिति॥ तन्न॥ एवं सति तत्र क्रमाभावात्स
रोरसः जरा राजनदी दीनेत्यादावविशेषप्रसंगादिति चेत्॥ उच्यते। प्रथमं घकारज्ञाने सति तदुत्तर
17 टकारज्ञाने जायमाने त्वाव्यवहितोत्तरत्वसंबंधेन पूर्वो वर्णो विशेषणतया भासते ततष्टकारे घ
कारविशिष्टे कारो विशेषणं। सोपि पूर्वद्वयविशिष्टः स्वोत्तरस्मिन्निति भवति पदज्ञानं॥ तस्मात्पदार्थो
पस्थितिस्ततः उक्तप्रकारेण पुनः पदांतरज्ञानं ततस्तदर्थोपस्थितौ तयोः परस्परं अन्वयबोधः पुनः
पदांतरज्ञानं ततः पदार्थोपस्थितौ तस्याप्यन्वयबोध इत्येवं क्रमेण अवांतरवाक्यार्थज्ञानपूर्वको महावा
क्यार्थबोध इति राजपुरप्रवेशन्यायेन केचनाहुः॥ तदुक्तं॥ यद्यदाकांक्षितं योग्यं सन्निधानं प्रपद्यते
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते इति॥ अन्ये तु॥ सर्वेषां वर्णानां प्रथमं स्वस्वार्थज्ञानात्सर्वपदानां

प॰दी॰ समूहालंबनस्मरणं न तु तत्तदर्थानामपि समूहालंबनरूपोपस्थितौ सत्यां पुनः प्रथममेव महाना क्वचिदर्थबोधः
॥१७॥ खलेकपोतन्यायेन साकांक्षः ॥ सोऽयं शाब्दबोधश्चतुर्धा ॥ विशेष्यविशेषणं तत्र विशेषणांतरमित्येकः ॥ रक्त
दंडवानिति यथा ॥ पुरुषे दंडः तत्र रक्तो विशेषणम् ॥ विशिष्टस्य वैशिष्ट्यावगाह्यन्यः यथा रक्तदंडवानि
त्यत्रैव रक्तत्वविशिष्टस्य दंडस्य वैशिष्ट्यबोधे एकत्र द्वयमिति न्यायेनान्यः दंडी कुंडली देवदत्त इति यथा ॥
एकविशेषणविशिष्टे विशेषणांतरवैशिष्ट्यावगाहन्यः ॥ ... मुरारिरिति यथोक्तविस्तारस्तु ग्रंथांतरा
दवधेयः ॥ अर्थापत्यामित्यनुभवसिद्धमतिरिक्तमेव प्रमाणं अर्थापत्तिकरणमर्थापत्तिः प्रमाणं ॥ तच्चानुपप दवदीप
त्तिज्ञानं यथा हि ॥ देवदत्तो पीनत्वं दिवाभोजनाभावं च जानतो रात्रिभोजनज्ञानं जायते ॥ न च प्रत्यक्षं तस
न्निकर्षाद्यभावेन नुपलब्भान् ... ॥ न चानुमानं व्याप्तिज्ञानात् ... यदि रात्रिभोजनाभावे ... दिवामात्रभु
जानेपि व्यभिचारित्वात् ॥ दिवाभुंजानत्वे सति पीनत्वाद्यभावात् ... व्याप्त्यग्रहात् दनुमित्व
योगात् ॥ तस्माद्दिवाभुंजानस्य पीनत्वस्यानुपपत्त्या रात्रिभोजनज्ञानं जायते सैव अर्थापत्तिरि
ति प्राभाकराः ॥ देवदत्तो रात्रिभोजी दिवाभुंजानत्वे सति पीनत्वात् ॥ यत्र रात्रिभोजनाभावस्तत्र
दिवाभुंजानत्वे सति पीनत्वाभाव इति व्यतिरेकिलिंगेन ... पृथगर्थापत्तिः प्रमाणमिति विशेषिक
ल साचोपलब्धिनिर्णयात्मकज्ञानस्याभावः ॥ तथा हि यस्मिन्नेव घटाभाववति घटो नास्तीति भ्रमसमये घटा ॥ राम
भावेन सह सन्निकर्षे सत्यपि तज्ज्ञानं नोपपद्यते ॥ अतस्तत्र घटानुपलब्धिः करणं तदभावान्न तज्ज्ञानं ॥ ॥२७॥
चक्षुरादिकं वाधिकरणादि ग्रहणार्थमनुपलब्धियो ... यथा च यदा

वर्ति२२

त्र घटं स्यात् उपलभ्येतेति तर्कसंपन्निरेवेति भट्टाः॥ एतादृश्यनुपलब्धिः॥ प्रसिद्ध सहकारिण्येवातो नानुपलब्धिः प्रमाणां
तरं॥ पृथक् प्रमाणांतरकल्पने गौरवादिति नैयायिकादयः॥ वस्तुतो घटे [illegible] घटाभावनिर्णयस्तु घटचक्षुःसंयोगे सत्य
पि ज्ञानानुत्पत्तेरभावे नुपलब्धेरपि भावग्रहहेतुत्वोपपत्तिः न चैवमुपपत्तिः अप्रसिद्धांतात् प्रमाणाभावाच्च॥ विवेचितं चैत
दन्यत्र॥ तस्मान्नानुपलब्धिः सहकारिणी न वा प्रमाणांतरमिति तत्वं॥ ॥ संभावनया जानामीति प्रतीतिसिद्ध जातिमतीसां
भवी॥ ॥ तत्करणं संभवः॥ यथा ब्राह्मण इति श्रुते विद्यायाः अस्ति संभावनेति दशादिसंख्यायाः प्रतीतौ॥ अज्ञातकर्तृ
कं प्रसिद्धं वाक्यमैतिह्यम्॥ गंगेयं मथुरेयं चेदो यमितिज्ञानमैतिह्यात्मक अन्यस्याप्रसरादिति पौराणिकाः॥ ब्राह्मणो
विद्यां भविष्यतीति चोत्कटकोटिकः संशय एव॥ शतं दशेति त्वनुमानं॥ तथा व्याप्तिज्ञानवतामेव जायमानत्वात् ऐतिह्यं न प्र
प्रमाणं चेष्टा हृदय एव॥ अन्यथा प्रमाणमेव नेति दार्शनिकाः॥ एतादृशा चेष्टयेत्थमर्थो बोद्धव्य इति संकेतितचेष्टातो बोधस्त्व
वगतया शब्दोपस्थितिस्ततो बोधः शाब्द एव॥ अन्यथा त्वेतादृश्या चेष्टया नुमानमेवेति न हस्तनेत्रादिचेष्टातो बोधा
नुरोधाच्चेष्टायाः पृथक् प्रमाणत्वमपीति तांत्रिकाः॥ तदेतैः प्रमाणैर्ज्ञायमाना बुद्धिरनित्यैव॥ मा सप्रत्यक्षा च जानामीति म न
नसानुभवात्॥ प्राभाकरास्तु॥ सर्वा बुद्धिः स्वप्रकाशा त्रितयविषयिणी च॥ आत्मा स्वात्मा विषयश्चेति त्रयं॥ घटमहं
जानामीति॥ सर्वज्ञानानुभवात्॥ ज्ञानस्य परप्रकाश्यत्वे तदपि परप्रकाश्यं तदपि परप्रकाश्यमित्यज्ञायमानज्ञानस्यो
काशादनवस्थापरंपरा निद्राद्यभावो वा स्यादित्याहुः॥ भाट्टास्तु॥ ज्ञानेन विषये ज्ञातता जन्यते॥ ज्ञातो घट इत्यनुभवात्॥ अध्या
त्वर्थक्रियाजन्यफलशालित्वेन घटे ज्ञानात्मा सादौ कर्मत्वमप्येवमेव संगच्छते॥ तथा च तया ज्ञानमनुमीयते घटो ज्ञान
विषयो ज्ञातता वत्त्वादिति॥ एवं ज्ञातालिंगयं ज्ञानमित्याहुः॥ एवं स्वप्रकाशाविधया ज्ञाततया ज्ञाने स्वप्रमाणे तद्गतं याथा

न

दी. र्थ्यरूपप्रामाण्यमपि स्वतो ज्ञानग्राहकसामग्रीग्राह्यं स्वरूपस्वतस्त्वं तत्राभ्युपगमादिति मीमांसकाः॥ नैयायिकास्तु।
१८॥ एवं सति जातं मे ज्ञानं प्रमा न वेति संशयानुपपत्तेर्नेदं युक्तं॥ किंत्वनुमानाज्ज्ञानं गृह्यते प्रवृत्तिविषयज्ञानोत्तरं जातं ज्ञानं
प्रमा फलवत्प्रवृत्तिजनकत्वादित्यनुमानात्तद्ग्रहः॥ मीमांसकानामर्थविसंवादजयुक्ताप्रामाण्यग्रहवत्॥ अन्यथा
तस्यापि स्वतो ग्राह्यत्वापत्तेश्च इति ज्ञानग्राहकं विशेषग्राह्यस्वरूपं परतः प्रामाण्यमङ्गः॥ भक्तिश्रद्धादयोपि
बुद्धिभेदाः॥ तत्राराध्यत्वेन ज्ञाने भक्तिः॥ वेदबोधितफलावश्यंभावनिर्णयः श्रद्धेत्यन्यत्र विस्तरः॥ सुखत्वजा
तिमद्धर्ममात्रजन्यतावच्छेदकजातिमद्वा निरुपाधिकेच्छाविषयत्वं वा सुखम्॥ तच्चतुर्विधं॥ वैषयिकं मानो
रथिकमाभ्यासिकमाभिमानिकं च॥ विषयसाक्षात्कारजमाद्यं॥ विषयध्यानजं मानोरथिकं॥ सूर्यनमस्कारा
भ्यासाज्जातमाभ्यासिकं शरीरलाघवादि रूपं तृतीयं अखण्डितगर्वजमाभिमानिकं॥ एवं दुःखेपि द्रष्टव्यं॥ दुःखत्वजातिमन्निरु
श पाधिद्वेषविषयत्वं वा दुःखं॥ इच्छामीत्यनुभवसिद्धेच्छात्वजातिमतीच्छा॥ सा च सुखमोक्षयोः सुखदुःखा
भावत्वप्रकारकज्ञानादुत्पद्यते॥ तत्साधनेषु सुखदुःखाभावसाधनताज्ञानादेव स्त्रीपुत्रादौ संन्यासादौ च यथा। संन्या
द्वेष्मीत्यनुभवसिद्धजातिमान् क्रोधापरपर्यायको द्वेषः॥ यतेत्यनुभवसिद्धयत्नत्वजातिमान्यत्नः॥ स त्रिविधः॥
जीवनयोनिरन्यश्च॥ जीवनादृष्टयोनिः कारणं यस्य स आद्यः॥ सर्वदा प्राणसंचारकारी गुरुभारोत्तोलनधावनादौ राम
प्रयत्नविशेषाणां सक्रियाविशेषैरन्वयव्यतिरेकाभ्यां कार्यकारणभावो बाधकं विना तत्सामान्ययोरपीति न्यायेन ॥१८॥
प्राणक्रियासामान्ये यत्नसामान्यजन्यत्वं दर्शनान्ति इत्यादि सकलकालिकस्य तस्यावश्यकत्वात्॥ स चातीन्द्रियः॥

श्री घ

द्वितीयो द्विधा॥ एको द्वेषजः सर्पादिष्वानिवृत्तिलक्षणः शत्रुवधादौ प्रवृत्तिरूपस्तु न द्वेषजः॥ किं तु तत्स्मरणेच्छाजः॥
इच्छाजन्योऽन्यः॥ एतेऽप्रत्यक्षाः॥ एते बुद्धीच्छाप्रयत्ना ईश्वरीया नित्याः जीवानामनित्याः॥ विहितयज्ञादिजन्य
तावच्छेदकजातिमान् धर्मः॥ ताश्च ज्योतिष्टोमयज्ञादिजन्यतावच्छेदिका विलक्षणस्वर्गादिजनकतावच्छेदि
काश्च तत्तददृष्टविलक्षणाः॥ ननु धर्मत्वमेका जातिर्मानाभावात्॥ धर्मत्वेन सुखत्वेन कार्यकारणभावेमा
नाभावादिति॥ अत एव बाधकाभावात् विज्ञानमानन्दं ब्रह्मेति श्रुतेश्चेश्वरे नित्यं सुखमस्तीति वेदान्तिनः॥
निषिद्धपरदारगमनादिजन्यतावच्छेदकजातिमानधर्मः॥ धर्मस्य चैता अपि नाना॥ तत्तद्दुःखजनकतावच्छे
दिकाश्च॥ ननु यज्ञादिजन्यातीन्द्रियधर्माधर्मयोः किं मानं॥ उच्यते॥ इष्टसाधनत्ववाचिना विधिना अनि
ष्टसाधनत्वबोधकनिषेधेन यागपरदारगमनादेस्तथात्वं बोध्यते॥ न च चिरनष्टस्य कालान्तरभाविस्वर्गा
दिसाधनत्वं साक्षाद्युक्तमतो व्यापारत्वेन तावदभ्युपेयो॥ न च यागादिध्वंस एव व्यापारोऽस्त्विति वाच्यं॥
19 एवं हि कारणीभूताभावप्रतियोगित्वेन यागादेः प्रतिबन्धकत्वापत्तेः॥ किं च कीर्त्तितधर्मादपि फलाप
त्तेः॥ व्यापारसत्त्वात्। अकीर्त्तितयागत्वेन कारणत्वेऽपि न कीर्त्तितात् फलमिति चेन्न॥ फलोत्तरकीर्त्तिता
दपि फलानापत्तेरिति दिक्॥ एतौ धर्माधर्मौ त्रिविधौ संचितौ क्रियमाणौ प्रारब्धसंज्ञौ च तत्रैतच्छरीरा
रम्भकं प्रारब्धं कर्म तद्भोगैकनाश्यं। जीवन्मुक्तिशास्त्रानुरोधात्॥ आद्यं ज्ञाननाश्यं ज्ञानाग्निः सर्वक

कल्पकोटि १

प.दी. र्मोपभोगस्य साक्षात्कृत्येत श्वेतिः शास्त्रादिसिद्धे वेदान्तिनः॥ सिद्धान्तस्तु॥ नाभुक्तं क्षीयते कर्म शतैरपि॥ अवश्यमे
॥१९॥ व भोक्तव्यं कृतं कर्म शुभाशुभमिति वचनस्य जाग्रत्त्वेनान्यथा व्यतिरेकेण संकोचे प्रमाणाभावात् संचितस्य ×चा॥
पि कायव्यूहेन भोगादेव नाशः भस्मसात्पदं तु लाक्षणिकं शीघ्रमेव भोगान्नाशं लक्षयतीति दिक्॥
क्रियमाणं च ज्ञानिनो नोत्पद्यते॥ लिप्यते न स पापेन पद्मपत्रमिवाम्भसेति वचनात्॥ ननु वंध्यादिभिः क्रियमा
णकर्मणो वैयर्थ्यापत्तिरिति चेन्न॥ तस्य लोकसंग्रहमात्रार्थत्वात्॥ वस्तुतस्तस्य पुत्रा दायमुपयन्ति सु
हृदः साधुकृत्यां द्विषन्तः पापकृत्यामिति श्रुतेस्तस्य परार्थत्वं स्फुटमित्यवधेयं॥ संस्कारत्वजातिमान् संस्का
रः॥ स त्रिधा वेगो भावना स्थितिस्थापकश्च॥ वेगेन गच्छतीति प्रतीतिसिद्धवेगत्वजातिमान् वेगः॥
मूर्त्तमात्रवृत्तिः॥ ॥भावनास्मृतिजनकः स्वजन्यस्मृतिनाश्यश्च संस्कार आत्ममात्रवृत्तिरतीन्द्रियः पूर्वज्ञान
व जन्यः॥ तत्र ज्ञानस्यानुभवत्वेनैव कारणतेति प्राञ्चः॥ नव्यास्तु॥ सकृदनुभूतस्य स्मरणोत्तरं संस्कारनाशेन
पुनर्विनानुभवं स्मरणप्रसंगात् पुनः पुनः स्मरणस्थले स्मरणादेव दृढतरसंस्कारोत्पत्तेरनुभवसिद्ध
त्वात्॥ अनुमितिशाब्दबोधस्मृत्यपि स्वर्गनरकं चानुभवामीत्यप्रतीतेरनुभवत्वजातौ प्रमाणाभावेन स्मरणसा यथ
न्यज्ञानत्वरूपस्यानुभवत्वस्य कारणतावच्छेदकत्वे गौरवापत्तेर्लाघवाज्ज्ञानत्वेनैव तत्कारणता ॥१९॥
स्यात्॥ तथा च पुनः पुनः स्मरणस्थले स्मरणादेव दृढदृढतरसंस्कारोत्पत्तिरित्येवं पूर्वानुभवतज्जन्य

संस्कारतज्जस्मृतीनांसमानविषयत्वमतोनद्वृष्टघटज्ञानात्पटस्मृतिः॥स्थितस्थापकश्चयथास्थितवस्तु
स्थैर्यानुमेयः पृथिवीवृत्तिरतींद्रियश्च॥शब्दंश्रृणोमीत्यनुभवसिद्धशब्दत्वजातिमान् शब्दः॥सद्विधा॥
ध्वनिर्वर्णश्च॥तत्रध्वनिःसंगीतशास्त्रसिद्धानेकभेदवान्तत्कारणंमुखवीणादि॥वर्णःककाराका
रादिः॥उभयत्राकाशःसमवायिकारणं॥भेर्याकाशसंयोगस्तालुकोष्ठाकाशसंयोगवंशदलाकाश
विभागादिरसमवायिकारणं॥जिह्वातात्वादिसंयोगवंशदलविभागादिर्निमित्तकारणं॥क्वचिच्छब्दो
पिशब्दासमवायिकारणं॥दूरेभेरीताडनेस्थलेतत्रभेर्याकाशसंयोगात्॥भिन्नस्तारतरोनदूरस्थपुरुषीय
श्रवणगोचरः॥तस्यमंदत्वेनानुभवात्॥किंतुभेरीशब्दाद्वीचीतरंगन्यायेन॥कदंबमुकुलन्यायेनवाशब्दा
द्बहुशब्दोत्पत्तिन्यायेनमंदादिभावेनजायमानेषुश्रोत्रावच्छिन्नोसन्नःस्वयंगृह्यते॥तेषुपूर्वंपूर्व
शब्दोत्रासमवायिकारणं॥सचस्वद्वृत्तिभेर्यादिप्रयोज्यजातिमंतंजनयतीतिभेरीशब्दोमयाश्रुतइ
ति धीर्नविरुध्यते॥तथाचासमवायिकारणंत्रेविध्याद्द्विविधोपित्रिधेतिफलितं॥उक्तंच॥संयोगा
द्विभागाच्छब्दाच्चशब्दनिष्पत्तिरिति॥सोयंशब्दोद्विक्षणस्थायी॥क्षणोत्तरमनुपलंभात्॥नाश
कानुरोधाच्च॥स्वजन्यःशब्दएवस्वनाशकः॥सचोत्पत्तिद्वितीयक्षणेपूर्वंनाशयतीतिसर्वद्विक्षणस्था
यिनः॥अंतस्यचजनकशब्दोनाशकः॥सुंदोपसुंदन्यायेनसनः॥कालिकएवांतेशब्दइत्येके॥अंत्यशब्दउप
त्यशब्दनाशानाश्यइतिसोपिद्विक्षणस्थाय्येवेत्यन्ये॥सर्वसाधारणंनिमित्तंवायुसंयोगनाशएव
वशब्दनाशकः॥तथाचवायुसंयोगजन्यतःपूर्वंक्रियानाशोशब्दोत्पत्तितःक्रियापूर्वदेशविभागसंयो

प.दी. गनाशाच्छब्दनाशादितिक्रमेण नाशात्॥ इत्यत्र तु सगुणत्वाशीतिनन्यायः॥ सोयं शब्दो नित्यश्च॥ योयं ग
॥२०॥ कारः श्रीदेवेनोक्तः स एव विष्णुनोच्यते॥ अहमत्र पूर्वमुक्त एवेदानीमुच्यते इति प्रत्यभिज्ञानात्॥ विभुश्च॥
योयं कार्योहंकारः अतः स एव सेतावनेनोच्यते॥ इति प्रतीतेः सर्वदेशव्यापित्वस्यानुभवात्॥ विभु
त्वाच्च द्रव्यमेव सः॥ योयं ततो मयाश्रुतस्स एव मंदः श्रूयत इति प्रतीतेस्तारत्वादिकमपि तत्र न विरुध्यते
इति मीमांसकाः॥ ॥उत्पन्नो गकारो नष्टो गकार इति प्रतीतेरुत्पत्तिनाशवानेव शब्दः सोयमि
ति तज्जातीयोयमिति भासत इति नैयायिकाः॥ ॥तत्त्वं वैयाकरणभूषणेस्माभिः प्रपंचितं॥ संयो
गविभागयोरनपेक्षं कारणं कर्म॥ स्वोत्तरभाविविभागजन्यसंयोगविभागजनकमित्यर्थः॥ तेन
कर्मणा संयोगे जननीये स्वोत्तरमुत्पद्यमानस्य विभागस्य प्रतिबंधकीभूतपूर्वसंयोगध्वंसस्या
पेक्षत्वात्मपि न क्षतिः॥ विभागस्य प्रतिबंधकाभावसंपादकत्वेनान्यथासिद्धत्वेनाजनकत्वात्संयो
गध्वंसस्य च भावरूपाभावात्॥ न चासमवायिकारणत्वेश्च पूर्वसिन्नुपाधिकित्वेन दोषः॥ संयोग
जसंयोगे पूर्वसंयोगस्य विभागजविभागे पूर्वविभागस्यान्यथाप्रत्येकं जनकत्वसत्त्वात् संयोगविभा राम
गेषूभयमनुपात्तं॥ उभयजनकत्वं कर्मण एव न संयोगादेरिति नातिव्याप्तिः॥ तच्चोत्क्षेपणापक्षेपणा॥२०॥
कुंचनप्रसारणगमनभेदात्पंचधा॥ भ्रमणादयस्तु गमनभेदा एव॥ तत्तु मूर्तमात्रवृत्ति मूर्तेष्वेव कार
णत्वात्॥ अतएव कर्मसमवायिकारणतावच्छेदकतया मूर्तत्वं जातिरिति नव्याः॥ इयत्तावच्छिन्नपरि
माणवत्त्वमुपाधिरेवेति प्राञ्चः॥ तच्च संयोगवेगप्रयत्नगुरुत्वद्रवत्वादितिस्वापकासमवायिकारणकं

हेतुः

धनुःसंयोगादिषोः प्रथमकर्म ततोवेगः कर्मजः ततःपुनःकर्म द्वितीयं। प्रागिगमनं तृतीयं॥ पतनं चतुर्थं॥
स्पंदनं पंचमं॥ पएर्दोद्विगुणितेयथावस्थानैषष्ठं। स्वजन्यसंयोगनाश्यो। अतएवक्षणचतुष्टयस्थायि
व्याप्यहेत्वोवेति प्रपंचितमन्यत्र॥ ॥ नित्यमेकमनेकसमवेतंसामान्यं॥ ॥ यथाघटत्वादि। घटत्वं
नित्यमेकमनेकघटेषुसमवेतंचेतिलक्षणसमन्वयः॥ तद्द्विधा॥ जातिरूपमुपाधिरूपंच॥ तत्रजातिः।
समवायेनैववर्त्तते। उपाधिरनेकपदार्थघटितोधर्मः। यथाकारणत्वानन्यथासिद्धत्वादिः॥ अनन्य
थासिद्धत्वंचावश्यकल्प्यमानपूर्ववर्त्तिनएवकार्यसंभवेतत्सहभूतत्वं। निष्कृष्टंप्रागुक्तं॥ प्रांचस्त्वन्य
थाप्याहुः॥ यथाअन्यत्रक्लृप्तनियतपूर्ववर्त्तिनएवकार्यसंभवेतत्सहभूतत्वं॥ यथारासभादेः॥ अन्यंप्र ९
तिपूर्ववर्त्तित्वेगृहीतेएवान्यंप्रतिपूर्ववर्त्तितयागृह्यमाणत्वंवा यथाकुलालपित्रादेः॥ एवंभावत्वाभाव
त्वेंद्रियत्वविषयत्वादिकमपि॥ तत्रसमवायेकार्थसमवायान्यतरः संबंधेनसत्ताभ्वत्वंभावत्वं
उक्तसंबंधेनसत्ताभावएवाभावत्वं॥ ज्ञानजनकमनःसंयोगाश्रयातींद्रियत्वमिंद्रियत्वं॥ इंद्रियम
नोयोगस्यज्ञानजनकत्वाल्लक्षणसमन्वयः॥ आत्ममनोयोगस्यज्ञानहेतुत्वादात्मन्यतिव्याप्तेर्वार
णायातींद्रियमिति। विषयतासंबंधेनसाक्षात्कारवत्वंविषयत्वं॥ शरीरादौतत्सत्वेपिनदोषः॥ उ
पधेयसंकरेप्युपाधेरसंकरात्॥ एवंकारणत्वावांतरंसमवायिकारणत्वमसमवायिकारणत्व
निमित्तकारणत्वंच॥ समवायेनकार्याधारत्वमाद्यं॥ तच्चद्रव्यमात्रवृत्ति। द्रव्यत्वस्यैवकार्यसम
वायिकारणतावच्छेदकत्वात्। समवायेकार्य्यसमवाय [illegible] त्वाकारणत्वमसमवायिका

२१

प.दी. रणत्वं। यथा पटे तंतुसंयोगस्य पटरूपे तंतुरूपस्य वा। उभयान्यकारणत्वं निमित्तकारणत्वं। य
२१। था घटे दंडादेः। एवं रूपरसगंधस्पर्शस्नेहबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मशब्दे
षु विशेषगुणत्वं॥ तच्च स्वाश्रयव्यावृत्तोपाधिकावांतरसामान्यवत्वं॥ पृथिवीजलादिभ्यो
त४ भिद्यते पाकजरूपात्। तेजईश्वरेभ्यो भिद्यते शुक्लभास्वररूपात् उष्णस्पर्शाद्वा इत्यादि। स्वाश्र
यस्य व्यावर्त्तकतावच्छेदकत्वेनोपयुक्तमवांतरजातिमत्वमस्तीति लक्षणसमन्वयः॥ एवं नि ल५
रूप्यमाने व्याप्त्यादावपीहोदाहरणं॥ नन्वेवं पृथुबुध्नोदराकारत्वलंबधवसगुणाश्रय
त्वसास्नादिमत्वाद्युपाधिभिरेव घटः पृथिवी द्रव्यमित्यादिप्रतीत्युपपत्तेर्घटत्वादिजातौ
किं मानमिति चेत्॥ उच्यते॥ कारणत्वकार्यत्वादयस्तावत्सावच्छिन्नाः तथा च चक्रकार्यताव
च्छेदकतया गंधस्य कार्यमात्रस्य च कारणतावच्छेदकतया दानहननादिभिः पुण्यपापोत्पत्तेस्त
त्कारणतावच्छेदककोटिप्रतिष्ठतया च घटत्वपृथिवीत्वद्रव्यत्वगोत्वादिकमावश्यकं। उपा राम
त् धेः कृतत्वे गौरवेणावच्छेदकत्वासंभवाद्बाधकाभावे च्छेदकत्वं जातिधर्मेष्वेव वर्त्तत इति सि
द्धांतात्॥ एवं बाधकाभावे अनुगतप्रतीत्यापादितसिद्धिः॥ स च बाधकसंग्रहः प्राचीनैरुक्तः॥ व्य ॥२१॥
क्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः॥ रूपहानिरसंबंधो जातिबाधक इति। घटत्वाके

संग्रहे

लशत्वं न पृथक् जातिः॥ तद्व्यक्त्यभेदात्। द्रव्यत्वात् गुणाश्रयत्वं न पृथक् जातिः तुल्यव्यक्तिक
त्वात्। शरीरत्वं न जातिः पृथिवीत्वादिना संकरप्रसंगात्॥ परस्परात्यंताभावसमानाधिकरण
योरेकत्र समावेशः संकरः। पृथिवीत्वं विना तैजसादिशरीरे शरीरत्वं वर्त्तते शरीरत्वं विना
च घटादौ पृथिवीत्वं। तदुभयमस्मदादिशरीरे। सामान्यत्वं न जातिः तत्रापि सामान्यस्वीका
रेऽनवस्थाऽसमाश्रयान्यतरापत्तेः॥ आकाशत्वं घटो वा न जातिः॥ नित्यमेकमनेकसमवेतं सामान्यमि
ति रूपहानात्। अत एवाभावः सास्नादिमत्त्वं च न जातिः॥ समवायत्वमपि लक्षणाक्रांतोपि न जातिः संबं
धविरहात्। संबंधिभिन्नत्वे सति संबंध्योरन्यतरस्यैव संबंधत्वेन स्वरूपसंबंधे संबंधव्यवहारस्य
गौणत्वात्स्वं स्वरूपसमवायेन वृत्तित्वाभ्युपगमेपि न वृत्तिरिति। तच्च सामान्यं त्रिविधं॥ परमपरं
परापरं च॥ सकलसामान्यव्यापकं परं सत्ता यथा॥ सामान्यांतराव्याप्यमपरं। परिमाणभेदेन भि
न्नेषु बाल्यकौमारादियुक्तशरीरेषु देवदत्तत्वादि यथा॥ कस्यचित्सामान्यस्य व्यापकं कस्यचिद्व्या
त्वा प्यं चापरं। द्रव्यत्वादि यथा पृथिवीत्वादेर्घटादेश्च व्यापकं सत्ताव्याप्यं च तदित्यन्यत्र विस्तरः॥ नित्य
द्रव्यवृत्तयोस्सा विशेषाः॥ समानजातीयरूपरसादिमत्परमाणवादीनां परस्परभेदकं विना भेदनि
र्णयासंभवाद्भेदकत्वेन विशेषाः अनुमीयंते॥ अनित्यद्रव्येष्वाश्रयेणैव भेदसंभवात्तत्र तेषु प्रमाणा
भावान्नित्यद्रव्यमात्रवृत्तित्वं तेषां। व्यावर्त्तकांतराभावे सत्यंते व्यावर्त्तकत्वेन स्वीक्रियमाणत्वादंस

प॰दी॰ ॥२२॥

त्वंचेतिलक्षणसमन्वयः॥यथाप्रजारक्षकत्वेनमहाराजआधेयकः॥सचस्वतएवस्वरक्षणसमर्थः॥
एवंविशेषाःस्वतएवव्यावृत्ताइतिनानवस्था॥शब्दसमवायिकारणतावच्छेदकतयाकाशेतत्सिद्धिः॥
अष्टद्रव्यातिरिक्तद्रव्यत्वादेराकाशमात्रवृत्तित्वेपिगौरवेणकारणतावच्छेदकत्वासंभवेनद्रव्य
त्वादिजातिवत्तस्यावश्यकत्वादितिदिक्॥अयुतसिद्धानांसंबंधःसमवायः॥विशेषणतान्यसंबं
धेनयावद्द्रव्यमसत्त्वंययोराश्रयाश्रयिभावस्तावयुतसिद्धौ॥यथागुणगुणिनौ॥पटोत्पत्तेःपूर्वंतन्तु
सत्त्वादव्याप्तेर्वारणायोभयेति॥वायुरूपाभावकालादेरयुतसिद्धसंवारणायविशेषणता
न्येति॥अभावस्यचविशेषणतैवसंबंधइत्युक्तं॥कालोपिविशेषणतयैवजगदाधारइतिस्पष्ट
मन्यत्र॥ ॥प्रागुत्पत्तेर्विनाशक्षणपर्यंतंययोराश्रयाश्रयिभावस्तावयुतसिद्धौ॥तदुक्तं॥तावे
वायुतसिद्धौद्वौविज्ञातव्यौययोर्द्वयोः॥अवश्यमेकमपराश्रितमेवावतिष्ठते॥तेनावयवावय
विनोगुणगुणिनोक्रियाक्रियावतोजातिव्यक्त्योर्विशेषनित्यद्रव्ययोश्चेति॥नतूत्पत्त्यादयः॥अव
यवावयविनः॥आश्रयनाशजन्यघटादिनाशस्थलेनाशसमयेघटादेरनाश्रितत्वान्नुपग
माद्विनाशक्षणपर्यंतमिति॥तन्न॥नित्यगुणनाशाश्रययोरसमानकालत्वेनासोविशेषनित्यद्रव्य
योरव्याप्तेः॥अयंसमवायस्तन्तुषुपटःसमवेतइत्यादिप्रत्ययैकसिद्धइतिनैयायिकाः॥वैशेषि रा॰
कास्तु॥समवायोनप्रत्यक्षः॥यावदाश्रयप्रत्यक्षंविनासंबंधप्रत्यक्षासंभवात्॥संबंधप्रत्य ॥२२॥
क्षेयावदाश्रयप्रत्यक्षस्यहेतुत्वात्॥अन्यथाघटोसंयुक्तावितिनिश्चयानुपपत्तेःसंयुक्ताविति॥

२३

घटेरूपसमवायइतिवदाकारेशाद्रूसमवायइत्यपिप्रसक्त्यापत्तेः॥एतेनसंयोगप्रसक्तेरेववाय
दाश्रयप्रसक्त्वंहेतुत्वोघवात्तुसंबंधप्रत्यक्षेसंयोग्यसमवायान्यतरस्वरूपसंबंधत्वस्यका
र्यतावच्छेदकत्वाकोदिप्रवेशगौरवादितिनिरस्तं॥उक्तप्रसक्त्यापत्तेर्वारणायतस्यावश्यक
त्वात्॥किंतुरूपादिघटादिसंबंधवत्तदाश्रितत्वादिसाध्यनुमानोसिद्धिः॥नवाधाराधेयभावा नं ४
दिरेवरूपघटयोःसंबंधोस्त्वितिशंक्यं॥घटनाशाद्रूदृष्टिरूपरसादिनाशवत्तद्वृत्तिघटा
दरभावस्यचनाशप्रसंगात्॥घटध्वंसकालिकपटेदृष्टिनाशत्वस्यघटनाशकार्यतावच्छेद
कत्वपर्यवसानात्॥समवायाभ्युपगमेचघटसमवेतनाशत्वमेवावच्छेदकमतोनदोषः॥न
चतथापिघटनाशात्घटत्वनाशापत्तिःभावनाशेप्रतिजन्यत्वेनकारणत्वात्॥एतेनसंबंधतया
समवायकल्पनेभूतलघटाभावादेरपिवैशिष्ट्याख्यसंबंधस्वीकारापत्तिरित्यपिपरास्तं॥तत्र
तत्कोभावादिति॥रूपवान्घटइत्यादिविशिष्टप्रत्यक्षंतुसंबंधाविषयत्वेपितन्नियम्यत्वमात्रे
णसंगच्छते॥अहंशरीरीत्याद्यदृष्टसंसर्गकप्रत्ययवदित्याहुः॥मीमांसकास्तु॥गुणगुण्यादीनां
तादात्म्यमेव॥नीलोघटश्चंचलःपृथक्मृदूघटइत्यभेदानुभवादतःसमवायोनिष्प्रमाणकइत्याहुः॥
ननुशक्तिसादृश्यादयोपिपदार्थांतराणिसंतीतिकथंषडेवभावाइत्ति॥मैवं॥अभिधारूपावाचक
त्वशक्तिस्तावदीश्वरेच्छारूपेवेत्युक्तं॥वह्नौदाहानुकूलाशक्तिस्तुकारणतारूपंसामान्यमेव॥व

प·दी·
॥२३॥

नच मण्यादिप्रतिबंधकसत्वे दाहापत्तिः कारणाय प्रतिबंधकाभावो दाहशक्तिस्वीकार आवश्यक इति वाच्यं ॥ मण्याभावादेरपि कारणत्वकल्पनया तन्निरासात् ॥ नानुत्तं वदेत्ति विधेयस्यानुवाद्यवचननिषेधरूपस्याभावस्य क्वत्वं गस्य पूर्वमीमांसायां कैवेधिकरणे व्युत्पादितत्वात् ॥ सादृश्यं च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वरूपं सामान्यमेवेति दिक् ॥ ॥अभावो द्विधा॥ ॥संसर्गाभावो भेदश्च॥ संसर्गारोपजन्यप्रतीतिविषयाभावश्चाद्यः ॥ भूतले घटो नेत्यारोप्येव निषेधप्रतीतेः ॥ स त्रिधा ॥ प्रागभावो ध्वंसोऽत्यंताभावश्च ॥ भविष्यतीति प्रतीतिविषयो विनाश्यभावः प्रागभावः ॥ तस्य ध्वंसप्रतियोगित्वं ध्वंसश्च ॥ उभय कालं घटप्रागभावो नष्ट इति प्रतीतेः ॥ उत्पत्तिमानभावो ध्वंसः ॥ घटध्वंसो जात इति प्रतीतेः ॥ तत्प्रागभावश्च घटस्तत्प्रागभावश्च ॥ उभयत्रापि ध्वंसो भविष्यतीति प्रतीतेः ॥ स च न विनाशी ध्वंसो नष्ट इति प्रतीत्यभावात् । व्यर्थध्वंसधाराकल्पनायां प्रमाणाभावाच्च ॥ उत्पत्तिविनाशशून्यः संसर्गाभावोऽत्यंताभावः ॥ ह्रदे वह्निर्नास्तीति ॥ भूतलाद्घटापसारणोनंतरं तदानयनात्पूर्वं च प्रतीतस्य घटकालेऽसत्त्वेपि न प्रतीतिः ॥ घटज्ञानेन प्रतिबंधात् । प्रतियोगिदेशस्य देशो च स्यान्नति प्रसंजकसंबंधत्वाद्यस्त्वार्थः ॥ उत्पत्तिविनाशशीलः प्रतियोगिसमानाधिकरणकादाचित्कस्तत्र संसर्गाभावांतरम् इत्यन्ये ॥ स द्विधा ॥ एकमात्रपर्याप्तधर्मावच्छिन्नप्रतियोगिताकः ॥ अनेकपर्याप्तधर्मावच्छिन्नप्रति- ॥२३॥
योगिताकश्च ॥ घटत्वादिप्रत्येकपर्याप्तं ॥ एकस्मिन्नपि घट इति प्रतीतेः ॥ तदवच्छिन्नश्चाद्यः ॥ द्वि

त्यनेकपर्यासंघटौ द्वावितिवदेको द्वावितिस प्रतीतेः॥ तदवच्छिन्नः॥ एकघटवति घटौ न स्त इति प्रतीतिवि
षयोऽसः॥ न च प्रतियोगिमतिकथमभाववृत्तिवाच्यं॥ पुरुषमात्रवति दंडी पुरुषो नास्तीति प्रतीतेर्दंडविशिष्ट
पुरुषाभावस्वीकारे प्रतियोगितावच्छेदकविशिष्टस्येवाभावविरोधित्वात्॥ न चैवं प्रतीतिर्दंडाभावं
पुरुषाभावं संयोगाभावं वा अवगाहते॥ केवलदंडपुरुषवति तत्संयोगवति पुरुषे दंडे च दंडी पुरुषो नास्ती
त्यनुगतप्रतीतेरिति दिक्॥ तादात्म्यारोपजन्यप्रतीतिविषयाभावो भेदः॥ घटः पटो नेत्यारोप्ये वतावि
बधात्॥ सोपि घटः पटो न घटो न घटपटौ इति प्रतीतेः॥ पूर्ववत् द्विधा॥ न च घटवति घटाभावो ना
स्ति घटो न घटभिन्न इति प्रतीतेरभावाभावोपि सिध्येत्॥ एवं सोपि नास्तीति प्रतीत्या तदभावो
पीत्यनवस्थेति शंक्यं॥ अत्यंताभावाभावप्रतियोग्येव घटादिः॥ अन्योन्याभावाभावः प्रतियोगिताव
च्छेदकयोः [illegible] घटत्वादिरूप इति स्वीकारात्॥ तयोरतिरेके प्रमाणाभावादिति च॥
न च्यास्त॥ अभावत्वेन प्रतीतेर्घटादिप्रतियोगितावच्छेदकयोः समानवृत्तिकोऽतिरेकात् एवासंताभावभेद
योरभावः॥ तदभावस्य घटाभावश्चेति नानवस्था॥ एवं ध्वंसस्य प्रागभावः प्रागभावस्य ध्वंसस्यातिरिक्त
एवेत्याहुः॥ नन्वधिकरणमेवाभावोऽस्तु। कुतोऽतिरिक्तस्वीकारः। कुतो वा तद्ग्रहणाय विशेषणता
स्वीकारः॥ भूतले घटो नास्तीत्याधाराधेयभावस्या[illegible]भेदेपि घटाभावे घटो नास्तीति
वदुपपत्तेः॥ अत्यंताभावनित्यत्वादि घटशून्यभूतले घटानंतरं तत्संबंधाभावमात्रस्वीका

नवं

॥२

र्थ वि क प्र.दी. रवदस्माभिस्तदा तदधिकरणे घटाभावत्वसंबंधो नास्तीत्यनुपेयं॥ अतस्तदधिकरणं घटाभावो
॥२४॥ न वा। आद्ये घटकालेपि घटोऽस्तीत्यापत्तिः॥ अन्त्ये घटानयनात्प्राङ् नास्तीत्यनापत्तिरिति परास्तं॥ तस्मान्नो
मि तिरिक्ताभावे प्रमाणमिति चेन्न॥ उच्यते तत्त्वज्ञानिनो क्रियमाणकर्मभिर्धर्माधर्मौ नोत्पद्येते इति सर्व
सिद्धं॥ तत्र कस्य हेतोः॥ मिथ्याज्ञानवासनारूपकारणाभावादिति चेन्न॥ अनेन मिथ्याज्ञानवासनाभा
हेतुतामपेक्ष्य प्राथमिकतत्त्वज्ञानव्यक्तिप्रागभावस्यैव हेतुत्वकल्पने लाघवात्॥ तथा च लाघवात्कारणा
त्वेन प्रागभावसिद्धिः॥ किं च अन्यतरकर्मजसंयोगे कर्मणः संयोगं प्रति न समवायेन हेतुता कर्मशू
न्ये तदुत्पत्तेर्व्यभिचारात्॥ नापि कालिकसंबंधेन। घटकर्मणस्तंभाकाशसंयोगापत्तेः॥ तस्मात्स्वज
न्यसंयोगप्रागभाववत्तासंसर्गेण कर्मणः कारणता वाच्येति प्रागभावसिद्धिः॥ एवं अनेकतंतुक
पटादिस्थले तत्तत्तंतुसंयोगानामपि न समवायेन हेतुता। संयोगेभ्यो द्विमात्रनिष्ठेभ्यः पटस्याधि
उ केषु सत्त्वे व्यभिचारात्। कालिकेन हेतुत्वे अतिप्रसंगः। स्वकारीयत्वस्वजन्यपटप्रागभाववत्तासंसर्गेण
हेतुता वाच्येति तत्सिद्धिः॥ एवं दाहे मण्यभावप्रतिबंधकाभावतया कारणे॥ तत्स्वाधिकरणत्वरूपत्वेन त
वदधिकरणानां कारणत्वे गौरवात्॥ अभावव्यतिरेकेण कारणभावे कस्याधिकरणे दुर्वचत्वेन त
द्योगात्त्वात्यंताभावोपि लाघवादिभिर्भिन्न आवश्यकः॥ एवमग्रिमे ध्वंसमंतरेणानुपपत्तेः [illegible] राम
च लाघवात् ध्वंसोप्यावश्यकः॥ तथा हि। न तावन्नित्यसुखाभिव्यक्तिर्मुक्तिः॥ सुखवदभिव्यक्तेर्नित्य ॥२५॥
त्वे इदानीमपि सत्त्वेन मुक्तिसंसारयोरविशेषप्रसंगात्॥ नापि नित्यसुखा[illegible]भिव्यक्तिर्मुक्तिसमये ना

यत्नेमनसेतिमतंसाधु॥जन्यभावस्यविनाशित्वनियमेनैकज्ञानव्यक्तेर्नाशेमुक्तिहानापत्तेः॥अभिव्य
क्तिपरंपराचजन्यज्ञानत्वावच्छिन्नेशरीरस्यहेतुत्वेनतदभावान्नयुक्ता॥तस्मादात्यंतिकोदुःखध्वंसोमुक्तिः।
आत्यंतिकत्वंचस्वसमानाधिकरणदुःखतत्प्रागभावासमानकालिकत्वं।इदानीसुखदुःखध्वंस
स्यास्मादीयदुःखप्रागभावसमानकालिकत्वात्स्वेत्यादि॥इदानीमस्मादीयदुःखध्वंसस्य
सुषुप्तिकालेदुःखासमानकालिकत्वसत्त्वात्प्रागभावेति।उपांत्यदुःखध्वंसस्यतत्प्रागभा
वासमानकालिकत्वाद्दुःखेति।तादृशध्वंसमोक्षस्तत्त्वज्ञानेनात्मनिजन्यते॥तद्यथा॥तत्त्व
ज्ञानान्मिथ्याज्ञानवासनानिवृत्तौरागद्वेषमोहानांनिवृत्त्याकर्मांतरेप्रवृत्तिरेवन॥पूर्वसंस्का
रात्प्रवृत्त्याकर्मोत्पत्तावपिनादृष्टोत्पत्तिः।अदृष्टहेतुमिथ्याज्ञानस्यतत्त्वज्ञानप्रागभावस्यवाअ
भावात्।तथाचोक्तंवाचस्पतिमिश्रैः॥मिथ्याज्ञानसलिलावसिक्तायामात्मभूमौधर्माधर्मांकु
रंजनयतइत्यादिना।प्राचीनादृष्टंचज्ञानाग्निःसहकृतयोगवशात्कायव्यूहेनयुगपत्सर्वभो
गान्नाशयति।।तथाचपूर्वकर्मसमाप्तौभोक्तव्यकर्मांतराभावाज्जन्माभावेसिद्धे।वर्त्तमानशरीरभो
ग्यसर्वदुःखनाशसिद्धौचात्यंतिकदुःखनिवृत्तिरिति।तथाचअक्षपादीयंसूत्रं।दुःखजन्मप्रवृत्ति
दोषमिथ्याज्ञानानामुत्तरोत्तरापायेतदनंतरापायादपवर्गइति॥ननुकिंतत्त्वज्ञानं।किंवामिथ्या
ज्ञानंकथंवातयोर्निवर्त्यनिवर्तकभावः॥उच्यते।देहेंद्रियादावनात्मन्यात्मबुद्धिरेवमिथ्याज्ञानं॥

प.दी. तत्तु संसारिणामनादिप्रवाहागतं दुर्बुद्धिकल्पितकुतर्कोद्भूततरं जायते। यथा लौकायतिकानां युक्त्या
॥२९॥ देहात्मवादे। निरात्मवादसाधकयुक्तिभिर्निरात्मकत्वमतिपन्ने शरीरव्यापिदुःखाद्युपलब्धिहेतु यु
ह क्तिभिः सकलदेहव्यापकत्वगादीन्द्रियसम्बन्धात्मपक्षे। इन्द्रियोपघातेपि बुद्धिसत्वमात्रेण सुखा
द्युपलब्धौ बुद्ध्यात्मवादे। तदभावेपि सुषुप्तौ श्वासात्मकत्वव्यवहारात् प्राणात्मवादे। ततश्च तन्
निरासार्थं पंचानां तेषामात्मत्वे युगपदेकत्र कस्यचिद्दृष्टार्थपरस्य तद्विरोधमन्तरा यत्र प्रव
त्त्यापत्तिनिरस्तासंकरापत्तिरित्यादिके देहाद्यतिरिक्तव्यापकात्मनिर्णयकश्रुत्या... समूहे
नु... बहुतरेषां पदार्थानामाभासत्वनिर्णायकः। श्रुतिस्मृतीतिहासानां तादृगात्मप्रतिपादकानां
तादृगात्मप्रतिपादकत्वे तात्पर्यनिर्णायकश्च न्यायसमूहोऽनुसंधेयः। तदनुसंधानमेव च विचारः।
स द्विधा। श्रवणमननभेदात्। तत्र न्यायैर्निर्णीततात्पर्यकश्रुत्यादिभिरात्मनिर्णयः श्रवणं। ततो
प्युक्तवादिदुस्तर्कजाले रसंभावनाविपरीतभावनोत्पत्तौ तन्निवारकन्यायानुसंधानं मननं। ततः
श्च व्यासंगत्यागेन देहाद्यतिरिक्तात्माकारमनोनुसंधानं निदिध्यासनं। ततो यथाभूतदेहाद्यतिरिक्ता
त्मसाक्षात्कारस्तत्वज्ञानात्मको जायते। यः समूलमिथ्याज्ञानमुन्मूलयति। विशेषदर्शनं हि न्य
लौकिकसाक्षात्कारत्वेन भ्रमनिवर्तकत्वं ज्ञातं। श्रुतिरप्येवमाह। तरति शोकमात्मवित्। आत्मा राम
त्मा वा रे द्रष्टव्यः श्रोतव्यो निदिध्यासितव्य इति। भिद्यते ज्ञानेनाशः शोकतरणं। तत्रानुरूपदर्शनं। ॥२०॥
तदेतन्निश्रवणादीनामपि [illegible] ज्ञाननाशकत्वे इत्यादि

सर्वपदार्थप्रतिपादनं व्यर्थमिति चेन्न। तत्त्वज्ञानमंतरेण तद्भिन्नत्वेनात्मज्ञानासंभवात् सा परंपरयो
गिनः सार्थकत्वात्। न्यायव्युत्पादकत्वेनाप्युपयोगाच्च। तच्चात्मज्ञानं भगवत्प्रसादमंतरेण न
भवतीति सोऽपि तत्त्वतो ज्ञेय उपास्यश्च॥ तथा च श्रुतिः॥ यदा चर्मवदाकाशं वेष्टयिष्यंति
मानवाः॥ तदा शिवमविज्ञाय दुःखस्यांतो भविष्यतीति॥ आचार्यैरप्युक्तं। स हि तत्त्वतो ज्ञात
आत्मसाक्षात्कारस्योपकरोतीति॥ नन्वीश्वरे किं मानं। न प्रत्यक्षं तस्य परोक्षत्वात्॥ नापि
क्षितिः सकर्तृका कार्यत्वात् घटवदिति अनुमानं मानं॥ परमाणुवंशतो बाधात्॥ घटादा
वंशतः सिद्धसाधनाच्च॥ अदृष्टद्वारा जीवकर्तृकत्वेन सिद्धसाधनाच्च॥ उपादानगोचरापरोक्ष
ज्ञानचिकीर्षाकृतिमत्त्वरूपकर्तृत्वेन कुलालादेर्हेतुतया असिद्धेश्च॥ अनेकज्ञानादिका
रणतावच्छेदकत्वकल्पने गौरवापत्तेः॥ कृतिमत्त्वस्यैव कर्तृपदार्थत्वाच्च॥ कृधातूत्तरतृचस्त
26 दर्थाश्रयवाचकत्वात्॥ अस्तु तर्हि कृतिमत्त्वेनैव हेतुतेति चेन्न। अनेककृतिषु कारणतावच्छे
दकत्वे कल्पने गौरवात्तेन रूपेणापि हेतुत्वासिद्धेः॥ किंचैवमीश्वरे ज्ञानेच्छयोरसिद्ध्यापत्तिः॥
श्रुतेस्तत्सिद्धिरिति चेत् सुखस्यापि स्वीकारापत्तेः॥ आनंदं ब्रह्मणो विद्वानिति श्रुतेः। न च वेद
कर्तृत्वेनेश्वरसिद्धिः॥ तस्यानादित्वात्॥ शिवाद्यादृषिपर्यंता स्मर्तारोऽस्य न कारक इति स्मृतेरिति
चेत्॥ अत्रोच्यते॥ कुलालादिचेतनासंवलितमृदादिभिर्घटादि[illegible]यत्नैस्तत्र कुलालादेर्हेतुते
ने का

प.दी. त्रिसर्वसिद्धिं॥तत्रकारणतावच्छेदकं नकुलालत्वादिजातिः॥ कुलालज्ञानादिनिरूपितज्ञान
॥२६॥ नात्वेन तत्त्वे सांकर्यापत्तेः॥नोपाधिरनिर्वचनात्॥घटजनकत्वस्य चदंडादिसाधारणत्वात्॥
घटजनकत्वेन घटहेतुताया असंभवाच्च॥ इतिमतेन हेतुतायाश्चत्वयैवनिरासात्॥तस्मादा
त्वमेवकारणतावच्छेदकं॥परंतु अनेनेदमेतदर्थमहं करिष्यामीत्याद्याकारकज्ञानरूपज्ञानत्वादेत
च्छाप्रयत्नास्तच्छापारा अन्वयव्यतिरेकसिद्धाः॥ तान्विनाकुलालादेर्घटाद्यनुपपत्तेः॥अतोद्व्यणु
काद्युपादानगोचरप्रमाणुमिदं द्व्यणुकं करिष्यामि आकारोनैतादृक्करिष्यामीत्यादिकज्ञा
नादिमानात्मा तत्कर्तावाच्यः॥ सचस्वस्वादृशशरीराद्यभावाद्यादृशजन्यज्ञानासंभवान्नित्य
ज्ञानवान्सिध्यन्नीश्वरइत्युच्यते॥एवंचकार्यमात्रकारणतावच्छेदकत्वेनैवजीवेश्वरसाधार
णात्मत्वजातिसिद्धिरितिवर्यविभाव्यम्॥तथाचतन्मते कार्यमात्मजन्यं कार्यत्वात्॥घटवदि
१ त्यनुमानमत्रप्रमाणं॥घटादौ व्यभिचारवारणाय जन्यांतं पदे विशेषणं॥पक्षतावच्छेदकाव
च्छेदकावच्छेदेनसाध्यसिद्धावुद्देश्यामस्यादूषणत्वेनतन्नोपदेयमेव॥एवंचेश्वरस्यसर्वज्ञता
पिसिध्यति॥केषांचित्पदार्थानांफलत्वेनकेषांचिद्धात्वेनकेषांचिद्धेतुत्वेनकेषांचिदवच्छेदकत्वे राम
नविषयीकरणादितिनिरूपितमस्माभिस्तर्करत्ने॥एवंवेदकर्तृत्वेनापिसिद्धिः॥तस्माद्य ॥२६॥
ज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे इति श्रुतेः॥ वेदः सकर्तृकः वाक्यत्वात्॥भारतादिवदित्यनु
मानाच्चवेदस्य सकर्तृकत्वावगमात्॥ स्मरणस्य समानवि

बयवाक्यापेक्षा ॥ तथाचेदः कौपांतरीयानुपूर्वीसदृशानुपूर्वीयानित्यस्यान्यत्रनिर्णीतत्वादिसलं
विस्तरैः ॥ तस्यचेश्वरस्योपासनाश्रुतिस्मृत्याद्यनुसारेणानेकधामहद्भ्योवगंतव्येतिपल्लवे
नालं ॥ बालबुद्धिप्रकाशार्थं पदार्थानां प्रदीपिका ॥ रंगोजिभट्टपुत्रेण कोंडभट्टेन निर्मिता ॥ १ ॥
इतिश्रीमत्सद्वाक्यप्रमाणपारावारीणरंगोजिभट्टात्मजकोंडभट्टकृता पदार्थदीपिका संपूर्णा

27

२३

॥पदार्थदिपिकासमाप्तं॥४॥